खादनीयभोजनीयकिच्चसाधकं पिट्ठं **पिट्ठखादनीयं**। ''अधोतं तालपिट्ठं खीरवल्लिपिट्ठ''न्तिआदिना गणियमानानं गणनाय अन्तो नत्थि, खादनीयभोजनीयकिच्चसाधकभावोयेव पनेतेसं लक्खणं, सुबहुं वत्वापि इमस्मिंयेव लक्खणे ठातब्बन्ति न वित्थारयाम। एवं सब्बत्थ। तम्बकतण्डुलेय्यादिमूलं **मूलखादनीयं**। पनसलबुजनाळिकेरादिफलं **फलखादनीयं। खज्ज**न्ति सक्खलिमोदकादिपुब्बण्णापरण्णमयं खादनीयञ्च। **गोरसो**ति खीरदधितक्कसङ्खातो गुन्नं रसो च। **धञ्ञभोजन**न्ति सानुलोमानं धञ्ञानं ओदनसत्तुकुम्माससङ्खातभोजनञ्च। **टीकायं** पन ''सानुलोमानि सत्तधञ्ञानि च पञ्चविधभोजनञ्चा''ति वुत्तं, तं न युत्तं, धञ्ञानं विसुं गहणे पयोजनाभावा, पयोजनसम्भवे च फलग्गहणेनेव तेसं गहणसम्भवतो।

यागुसूपप्पभुतयोति यागु च सूपञ्च, तं पभुति येसं तेति एते यावकालिका होन्तीति सम्बन्धो। एत्थ च पभुति-सद्देन मच्छमंससङ्खातं धञ्ञभोजनतो अवसिट्ठं भोजनञ्च पिट्ठमूलफलखादनीयतो अवसिट्ठं कन्दखादनीयं, मुळालखादनीयादिञ्च सङ्गण्हाति। तेसु दीघो च भिसकन्दादि वट्टो च उप्पलकण्डादि **कन्दखादनीयं,** पदुममूलादि च तंसदिसं एरकमूलादि च **मुळालखादनीयं,** तालादीनं कळीरसङ्खाता मत्थका **मत्थकखादनीयं,** उच्छुक्खन्धादयो नीलुप्पलादीनं दण्डक्खन्धकादि **खन्धखादनीयं,** तम्बकतण्डुलेय्यादीनं पण्णं **पत्तखादनीयं,** उच्छुतचोव एको सरसो **तचखादनीयं,** तम्बकसिग्गुपुप्फादि **पुप्फखादनीयं,** लबुजट्ठिपनसट्ठिआदिकं **अट्ठिखादनीयं**।

८६. ''**मधू**''तिआदिना यामकालिकं दस्सेति। मधु च मुद्दिका च सालूकञ्च चोचञ्च मोचञ्च अम्बञ्च जम्बु चाति द्वन्दो। मुद्दिका फलेपि इत्थियं, फले सेसा नपुंसके, ''जम्बु'' इति फलवाची नपुंसकसद्दन्तरं, ततो जातं मधुपानादि **मधु... पे०... जम्बुजं,** तञ्च फारुसञ्च पानकन्ति योजना। तत्थ **मधुजं पानं** नाम मुद्दिकानं जातिरसं उदकसम्भिन्नं कत्वा कतपानं। तं अत्तना कतं पुरेभत्तमेव सामिसं निरामिसम्पि वट्टति। अनुपसम्पन्नेहि कतं लभित्वा पन पुरेभत्तं पटिग्गहितं पुरेभत्तं सामिसम्पि वट्टति, पच्छाभत्तं पन निरामिसमेव वट्टति। एस नयो सब्बपानेसु। **मुद्दिकजं पानं** नाम मुद्दिकानं उदके मद्दित्वा कतपानं। तथा सेसपानानि यथानुरूपं वेदितब्बानि, **सालूकं** रत्तुप्पलादीनं सालूकं। **चोचं** अट्ठिककदलिफलं। **मोचं** अनट्ठिकं। इमानि अट्ठ पानानि सीतानिपि आदिच्चपाकानिपि वट्टन्ति, अग्गिपाकानि पन न वट्टन्ति। तेनाह ''**नाग्गिसन्तत्त**''न्ति।

८७-८. अवसेसानि पन वेत्ततिन्तिणिकमातुलुङ्गकपित्थकरमन्दादिखुद्दकफलपानानि अट्ठपानगतिकानेव। तेनाह ''**सानुलोमानि धञ्ञानि, ठपेत्वा फलजो रसो**''ति। एकस्स पन वक्खमानानञ्च ''पुप्फरसो''तिआदीनं ''सीतोदमद्दितादिच्चपाको वा यामकालिको''ति इमिना सम्बन्धो वेदितब्बो।
तालनाळिकेरपनसलबुजअलाबुकुम्भण्डपुस्सफलतिपुसएळालुकफलानीति नव महाफलानि, सब्बञ्च अपरण्णं सत्तधञ्ञानि अनुलोमेन्तीति सह अनुलोमेहीति **सानुलोमानि**। सानुलोमधञ्ञानं पन रसो यावकालिको। ''सानुलोमानि धञ्ञानी''ति फलानि विञ्ञायन्ति। फलसुतिया ''सेसफलजो''ति वत्तब्बे गम्यमानत्ता न वुत्तं। **मधुकपुप्फमञ्ञत्रा**ति मधुकपुप्फं ठपेत्वा। **पक्कडाकज**न्ति पक्केहि यावकालिकेहि डाकेहि जातं रसं। सीतमुदकं **सीतोदं,** खीरोदे विय सीतोदे मद्दितोति तप्पुरिसो। **आदिच्च**-सद्दो आतपे वत्तति उपचारतोति आदिच्चे पाको यस्साति समासो।

८९. सत्ताहकालिकं दस्सेति ''**सप्पी**''तिआदिना। तत्थ **सत्ताहकालिका**ति यथावुत्तानि सप्पिआदीनि सत्ताहकालिकानि। इदानि सप्पिआदीनि विभजति ''**सप्पी**''तिआदिना। तत्थ येसं गोमहिं सादीनं मंसं कप्पति, तेसं सप्पि सप्पि नामाति ''**सप्पी**''तिआदिना सप्पिलक्खणमाह। अकप्पियमंससप्पिनोपि कप्पियसम्भवे तत्थ सत्ताहातिक्कमे

दुक्कटस्स वक्खमानत्ता निस्सग्गियवत्थुमेव चेत्थ दस्सेतुं "**येसं मंसमवारित**"न्ति वुत्तं। खीरादीसु हि तेसमकप्पियं नाम नत्थि। नवनीतस्स सप्पिसदिसताय नवनीतलक्खणं विसुं न वुत्तं। उपरि सप्पिपिण्डं ठपेत्वा सीतलपायासं देन्ति, यं पायासेन असंसट्ठं, तं सत्ताहकालिकं, मिस्सितं पन आदिच्चपाकं कत्वा परिस्सावितं, तथा खीरं पक्खिपित्वा पक्कतेलम्पि, तेसु **नवनीतं** नाम नवुद्धटं। तेन कतं पन **सप्पि**।

९०. तिला च वसा च एरण्डानि च मधुकानि च सासपा चाति द्वन्दो। तेहि सम्भवो यस्साति बाहिरत्थो, तं तेलं नामाति अत्थो। खुद्दा खुद्दमधुमक्खिका च भमरा च **खुद्दभमरं,** खुद्दजन्तुकत्ता नपुंसकेकवचनं। मधुं करोन्तीति मधुकरियो, ता एव मक्खिका **मधुकरिमक्खिका,** खुद्दभमरमेव मधुकरिमक्खिकाति कम्मधारयो। ताहि कतं **मधु** मधु नामाति अत्थो। **टीकायं** पन विसुं मधुकरी-सद्दं विकप्पेत्वा "दण्डकेसु मधुकरा मधुकरिमक्खिका नामा"ति वुत्तं। मधुपटलं वा मधुसित्थकं वा सचे मधुना मक्खितं, मधुगतिकमेव। तुम्बलकानं चीरिकानञ्च निय्याससदिसं मधु पन यावजीविकं। रसो निक्कसटो आदि यस्सा सा **रसादि। आदि**-सद्देन फाणितादीनं गहणं, सा उच्छुविकति। **पक्का**ति अवत्थुकपक्का वा, **फाणितं** फाणितं नामाति अत्थो। सीतूदकेन कतमधुकपुप्फफाणितं पन फाणितगतिकमेव। अम्बफाणितादीनि यावकालिकानि। एतानि यथावुत्तानि सप्पिआदीनि पुरेभत्तं सामिसपरिभोगेनापि, पच्छाभत्ततो पट्ठाय पन तानि च पच्छाभत्तं पटिग्गहितानि च सत्ताहं निदहित्वा निरामिसपरिभोगेन परिभुञ्जितब्बानि।

९१. इदानि ओदिस्स अनुञ्ञातवसाय पाकतो विभागं दस्सेत्वा ततो सप्पिआदीनं दस्सेतुं "**सवत्थू**"तिआदिमाह। तत्थ पुरेभत्तं **सामं वा** अत्तना एव। **वा**-सद्देन परेहि वा। **अमानुसा** मनुस्सवसारहिता। **वसा** अच्छादीनं अकप्पियानं, सूकरादीनं कप्पियानञ्च सत्तानं वसा। सवत्थुपक्का सत्ताहकालिका होतीति सेसो। **सवत्थुपक्का**ति सवत्थुकं कत्वा पक्का। अयमेत्थ अधिप्पायो – सचे पन वसं पुरेभत्तं पटिग्गहेत्वा पचित्वा तेलं परिस्सावितं सत्ताहानि निरामिसपरिभोगेन परिभुञ्जितब्बं। अथ परेहि कतं पुरेभत्तं पटिग्गहितं, पुरेभत्तं सामिसम्पि वट्टति, पच्छाभत्ततो पट्ठाय निरामिसमेव, नो चे, दुक्कटं होतीति। कारिये कारणोपचारेन पनेत्थ "**वसा**"ति तेलमेव वुत्तं, वसा पन यावकालिकाव।

टीकायं पन वसाय "सत्ताहकालिके आगतट्ठानं नत्थीति वदन्ती"ति वत्वा "तं उपपरिक्खितब्ब"न्ति वसाय सत्ताहकालिकत्तमासंकियं वुत्तं। किमेत्थ उपपरिक्खितब्बं? भेसज्जं अनुजानता भगवता "यानि खो पन तानि गिलानानं भिक्खूनं पटिसायनीयानि भेसज्जानि, सेय्यथिदं – सप्पि नवनीतं तेलं मधु फाणितं, तानि पटिग्गहेत्वा सत्ताहपरमं सन्निधिकारकं परिभुञ्जितब्बानी"ति (पारा० ६२२) सप्पिआदीनमेव सत्ताहकालिकत्तं वुत्तं। **भेसज्जक्खन्धके**पि "अनुजानामि, भिक्खवे, तानि पञ्च भेसज्जानि पटिग्गहेत्वा कालेपि विकालेपि परिभुञ्जितु"न्ति (महाव० २६०) तानि पञ्चेव "भेसज्जानी"ति वत्वा तेलं नियमतो "अनुजानामि, भिक्खवे, वसानि भेसज्जानि अच्छवसं मच्छवसं सुसुकावसं सूकरवसं गद्रभवसं काले पटिग्गहितं काले निप्पक्कं काले संसट्ठं तेलपरिभोगेन परिभुञ्जितु"न्ति (महाव० २६२) वुत्तं। **भेसज्जसिक्खापदट्ठकथाय**ञ्च (कङ्खा० अट्ठ० भेसज्जसिक्खापदवण्णना) "ठपेत्वा मनुस्सवसं अञ्ञं यं किञ्चि वस"न्तिआदिना वसातेलस्स विधानं दस्सेत्वा "अञ्ञेसं यावकालिकवत्थूनं वत्थुं पचितुं न वट्टतियेवा"ति वदता अट्ठकथाचरियेन यावकालिकेसु वसं ठपेत्वा अञ्ञेसं यावकालिकवत्थूनं वत्थुं पचितुं न वट्टतीति अयमेत्थ अत्थो दीपितोति वसा "यावकालिकायेवा"ति विञ्ञायतीति को एत्थ सुखुमो नयोति।

अञ्ञेसं वसातेलतो परेसं **यावकालिकवत्थूनं** येसं तेसं यावकालिकवत्थूनं सप्पिआदीनं **वत्थुं** यावकालिकसङ्खातं खीरादिकं न पचेति सम्बन्धो। अयमेत्थ अधिप्पायो – यथा सत्ताहपरिभोगत्थाय वसं काले पटिग्गहेत्वा काले पचितुं

वट्टति, न एवं सप्पिआदीनं वत्थुभूतं खीरादियावकालिकं, तं पन सत्ताहपरिभोगत्थाय कालेपि न वट्टति। तानि हि यदि तं पटिग्गहेत्वा सयं कतानि, पच्छाभत्ततो पट्ठाय न वट्टन्ति सवत्थुकप्पटिग्गहितत्ता, सामिसं न वट्टन्ति सामंपक्कत्ता, पुरेभत्तम्पि न वट्टन्ति यावकालिकवत्थुतो विवेचितत्ता। परेहि कतानि पन पुरेभत्तं सामिसम्पि वट्टन्ति अत्तना अपक्कत्ता। यावजीविकानि तु सासपमधुकएरण्डअट्ठीनि तेलकरणत्थं पटिग्गहेत्वा तदहेव कतं तेलं सत्ताहकालिकं, दुतियदिवसे कतं छाहं वट्टति, एवं याव सत्तमदिवसे कतं तदहेव वट्टति, उग्गते अरुणे निस्सग्गियं, अट्ठमे दिवसे अनज्झोहरणीयं, उग्गहितेन येन केनचि वत्थुना कतसदिसं होति। तेलत्थाय पटिग्गहितसासपादीनं सत्ताहातिक्कमेन दुक्कटं। निब्बत्तितं सप्पि वा नवनीतं वा कालेपि विकालेपि पटिग्गहेत्वा पचितुं वट्टति। तं पन तदहु पुरेभत्तम्पि सामिसं न वट्टति, संसग्गतो यावकालिकम्पि सामंपक्कं सियाति निरामिसं पन सत्ताहम्पि वट्टति।

९२. इदानि ''**हलिद्दि**''न्तिआदिना यावजीविकं दस्सेति। तत्थ ''**हलिद्दि** नाम निसा''तिआदिना वुच्चमानेपि परियायवचने सम्मोहो सियाति न तंवचनेन भुसं सम्मोहयिस्साम, तस्मा तानि उपदेसतोव वेदितब्बानि। तत्थ ''**हलिद्दि**''न्ति बिन्दुआगमेन वुत्तं। उपचारेन तु मूलादीनि हलिद्दादिसद्देन वुत्तानि। ता हलिद्दादयो केचि इत्थिलिङ्गायेव। मूलफले वचत्तञ्च...पे०... भद्दमुत्तञ्च अतिविसाति पदच्छेदो। **पञ्चमूल**-सद्देन चूळपञ्चमूलमहापञ्चमूलानि गहितानि। **आदि**-सद्देन वजकलिमूले जरट्ठन्ति एवमादीनं सङ्गहो।

९३-५. **गोट्ठफल**न्ति मदनफलन्ति वदन्तीति। तीणि फलानि यस्सं सङ्गहितं सा **तिफला। एरण्डकादीन**न्ति **आदि**-सद्देन जातिरुक्खादीनं गहणं। सुलसादीनं पण्णन्ति सम्बन्धो। **आदि**-सद्देन असोकादीनं गहणं। **सूपेय्यपण्ण**न्ति तम्बकतण्डुलेय्यादिसूपयोग्गपण्णं। उच्छुनिय्यासं ठपेत्वा सब्बो निय्यासो च सरसं उच्छुजं तचञ्च ठपेत्वा सब्बो तचो चाति सम्बन्धो। तत्थ हिङ्गुकणिकारनिय्यासादि सब्बो **निय्यासो** नाम। निरसउच्छुतचादि सब्बो **तचो** नाम। **लोणं** सामुद्दादि। **लोहं** अयतम्बादि। **सिला** काळसिलादि।

९६. **सुद्धसित्थ**न्ति मधुना अमक्खितं। मधुमक्खितं पन सत्ताहकालिकं। **यञ्च किञ्चि सुझापित**न्ति दुज्झापितं अकत्वा सुज्झापितं यं किञ्चि च। **विकटादिप्पभेद**न्ति विकटं गूथमत्तिकामुत्तछारिकासङ्खातं आदि यस्स, सो पभेदो यस्साति बाहिरत्थो, तं। यं किञ्चि चाति सम्बन्धो। एत्थ पन **आदि**-सद्देन कन्दखादनीये खीरकाकोलादयो, मुळालखादनीये हलिद्दिसिङ्गिवेरमूलादयो, मत्थकखादनीये हलिद्दिसिङ्गिवेरकळीरादयो, खन्धखादनीये उप्पलपण्णदण्डादयो, पुप्फखादनीये चम्पकपुप्फादयो, अट्ठिखादनीये मधुकट्ठिएरण्डसासपादयो, पिट्ठखादनीये अधोततालपिट्ठादयो च सङ्गहिताति दट्ठब्बा।

९७. इदानि सब्बसो यावजीविकं दस्सेतुं असक्कुणेय्यत्ता वुत्तानि च अवुत्तानि च एकतो सम्पिण्डेत्वा तत्थ लक्खणं ठपेन्तो ''**मूल**''न्तिआदिमाह। तत्थ ''सारो''ति वत्तब्बे ''**सार**''न्ति लिङ्गविपल्लासेनाह। ''सारो बले थिरंसे चा''ति हि निघण्डु। **आहारट्ठ**न्ति आहारेन जातो अत्थो पयोजनं आहारत्थो, सोव आहारट्ठो, तं आहारकिच्चन्ति वुत्तं होति।

९८. इदानि चतूसु कप्पियाकप्पियादिविभागं दस्सेति ''**सब्बा**''तिआदिना। तत्थ सब्बे कालिका, तेसं सम्भोगो अनुभवोति समासो। **काले**ति पुब्बण्हकाले। **सब्बस्सा**ति गिलानागिलानस्स। **सति पच्चये**ति तीसु यामकालिकं पिपासादिकारणे सति, सत्ताहकालिकं यावजीविकञ्च गेलञ्ञकारणे सतीति अत्थो, कालतो विगतो **विकालो,** तस्मिं, यामकालिकं विकाले आहारत्थाय अज्झोहरणे, सत्ताहकालिकं पन यावजीविकञ्च तदत्थाय पटिग्गहणमत्तेपि दुक्कटं।

९९. **उभो**ति यावकालिकं यामकालिकञ्च। तत्थ यावकालिकं अत्तनो कालातिक्कन्तं विकालभोजनभिक्खापदेन

पाचित्तियं जनयति, यामकालिकं यामातिक्कन्तं सन्निधिसिक्खापदेन। एते उभोपि अन्तोवुत्थञ्च सन्निधिञ्च जनयन्तीति सम्बन्धो। **''अन्तोवुत्थं सन्निधि''**न्ति भावप्पधानोयं निद्देसो, अन्तोवुत्थत्तं सन्निधित्तञ्चाति अत्थो।

१००. अतिनामितेति अतिक्कामिते। **पाचित्ती**ति सत्ताहातिक्कन्तं भेसज्जसिक्खापदेन निस्सग्गियपाचित्तियापत्ति च होतीति अत्थो। सचे द्विन्नं सन्तकं एकेन पटिग्गहितं अविभत्तं होति, सत्ताहातिक्कमे द्विन्नम्पि अनापत्ति, परिभुञ्जितुं पन न वट्टति। **पाळिनारुळ्हे**ति पाळियं अनारुळ्हे सप्पिआदिम्हि सत्त अहानि अतिनामितेति सम्बन्धो। **सप्पी**ति मनुस्सादीनं सप्पि। **आदि**-सद्देन तेसंयेव नवनीतं, नाळिकेरादितेलं, सीतोदकेन कतं मधुकपुप्फफाणितञ्च सङ्गहितं।

१०१. निस्सट्ठलद्धन्ति निस्सट्ठं विनयकम्मवसेन निस्सज्जितञ्च तं लद्धञ्च पुन तथेवाति निस्सट्ठलद्धं। तं गहेत्वाति सेसो। निस्सज्जनविधानं पन वक्खमाननयेन वेदितब्बं। **''नङ्ग''**न्तिआदि उपलक्खणमत्तं। तेन मक्खितानि कासावादीनि च पन अपरिभोगानियेव। अञ्ञस्स पन कायिकपरिभोगो वट्टति। **विकप्पेन्तस्स सत्ताहे सामणेरस्सा**ति एत्थ **टीकायं** ''इदं सप्पिं तुय्हं विकप्पेमी''तिआदिना तेसं तेसं नामं गहेत्वा सम्मुखापरम्मुखाविकप्पनवसेन अत्थं दस्सेत्वा तं साधयन्तेहि अविकप्पिते विकप्पितसञ्ञी निस्सग्गियं पाचित्तिय''न्ति आपत्तिवारे पाळि आहटा। ''सचे उपसम्पन्नस्स विकप्पेति, अत्तनो एव सन्तकं होति, पटिग्गहणम्पि न विजहती''ति दोसं वत्वा अनुपसम्पन्नस्स विकप्पने अत्तसन्तकत्ताभावो, पटिग्गहणविजहनञ्च पयोजनं वुत्तं। तत्थ वदाम – आपत्तिवारे ''अविकप्पिते''तिआदिपाळियेव नत्थि, ''अनधिट्ठिते अधिट्ठितसञ्ञी निस्सग्गियं पाचित्तियं, अविस्सज्जिते विस्सज्जितसञ्ञी निस्सग्गियं पाचित्तिय''न्तिआदिना (पारा॰ ६२४) पाळिया आगतत्ता तदनुरूपमेव अनापत्तिवारे ''अधिट्ठेति, विस्सज्जेती''तिआदिनाव पाळि आगता। यदि भवेय्य, वण्णनीयट्ठानताय अट्ठकथाय भवितब्बं, न चेत्थ अट्ठकथायं विज्जति। अनुपसम्पन्नस्स विकप्पने च कथं पटिग्गहणं विजहति सिक्खापच्चक्खानादीसु छसु पटिग्गहणविजहनकारणेसु विकप्पनस्स अनन्तोगधत्ता, तस्मा नायमेत्थ अत्थोति।

मयमेत्थ एवमत्थं भणाम – **विकप्पेन्तस्सा**ति एत्थ **विकप्पनं** संविदहनं ''चित्तसङ्कप्पो''तिआदीसु विय, उभयत्थ पन उपसग्गेहि नानत्तमत्तं, तस्मा अन्तोसत्ताहे सामणेरस्स यस्स कस्सचि विकप्पेन्तस्स संविदहन्तस्स परिच्चागसञ्ञं परिच्चागचेतनं परिच्चागाधिप्पायं उप्पादेन्तस्स अनापत्तीति अत्थो। इदञ्च **महासुमत्थेर**वादमोलुब्भ वुत्तं। वुत्तञ्हि ''तेन चित्तेना''तिआदीसु पाळिवचनेसु अधिप्पायं दस्सेन्तेन, ''इदं कस्मा वुत्तं। एवञ्हि अन्तोसत्ताहे दत्वा पच्छा पटिलभित्वा परिभुञ्जन्तस्स अनापत्तिदस्सनत्थ''न्ति (पारा॰ अट्ठ॰ २.६२५)। **महापदुमत्थेरो** पनाह ''सत्ताहातिक्कन्तस्स पन परिभोगे अनापत्तिदस्सनत्थमिदं वुत्त''न्ति (पारा॰ अट्ठ॰ २.६२५)। अयमेव वादो तेसु सुन्दरतरो। सत्ताहे मक्खनादिं अधिट्ठतो च अञ्ञस्स ददतोपि च अनापत्तीति सम्बन्धो। **आदि**-सद्देन अब्भञ्जनादिं सङ्गण्हाति। अयमेत्थाधिप्पायो – सप्पिआदिं अब्भञ्जनादिं मधुं अरुमक्खनं, फाणितं घरधूपनं अधिट्ठतो अनापत्तीति। **अञ्ञस्सा**ति उपसम्पन्नस्स वा अनुपसम्पन्नस्स वा।

१०२. यावकालिकआदीनि अत्तना सह संसट्ठानि सब्भावं गाहापयन्तीति सम्बन्धो। **सब्भाव**न्ति सस्स अत्तनो भावो द्वित्ते सब्भावो, तं। **तस्मा**ति यस्मा एवं, तस्मा। **एवमुदीरित**न्ति एवं ''विकप्पेन्तस्स सत्ताहे''तिआदिना वुत्तं। अयमेत्थ अधिप्पायो – यस्मा अत्तना संसट्ठानि अत्तनो भावं गाहापयन्ति यावकालिकादीनि, तस्मा सत्ताहातिक्कामितानि सत्ताहकालिकानि पाचित्तियजनकानि संसट्ठानि अत्तसंसट्ठानिपि पाचित्तियजनकानि करोन्तीति अविकप्पनादिम्हि सति ब्यतिरेकतो पाचित्तियापत्तिपरिदीपकं ''विकप्पेन्तस्सा''तिआदिकं वाक्यत्तयं वुत्तन्ति। **टीकायं** पन ''इदानि वक्खमानं सन्धाय **एवन्ति वुत्त**''न्ति वुत्तं। तं वक्खमानस्स अतीतउदीरितत्तायोगतो कथं युज्जतीति। **एवमुदीरित**न्ति वा पाळियं

अट्ठकथायञ्च एवमेव वुत्तन्ति अत्थो। **एव**-सद्दो अवधारणे।

१०३-५. इदानि अत्तसंसट्ठानं यावकालिकादीनं सब्भावगाहापनं सरूपतो दस्सेतुं **"पुरे"**तिआदिमाह। तत्थ **सत्ताह**न्ति सत्त अहानि यस्स तं सत्ताहं, सत्ताहकालिकं। **च**-सद्दो अट्ठानप्पयुत्तो, सो सत्ताहञ्च यावजीविकञ्चाति योजेतब्बो। **सेसकालिकसम्मिस्स**न्ति सेसेहि तदहु पटिग्गहितेहि कालिकेहि यावकालिकयामकालिकसङ्खातेहि सम्मिस्सं। **पाचित्ती**ति सन्निधिसिक्खापदेन पाचित्ति। **तदहु पटिग्गहित**न्ति तस्मिंयेव दिने पुरेभत्तं पटिग्गहितं। **तदहेवा**ति तस्मिंयेव दिने पुरेभत्तमेव। **सेस**न्ति सत्ताहकालिकं यावजीविकञ्च। **एव**न्ति यामे एव परिभुञ्जयेति विजानीयन्ति सम्बन्धो। **इतर**न्ति सत्ताहकालिकतो अञ्ञं यावजीविकं।

कालिकनिद्देसवण्णना निट्ठिता।

९. पटिग्गाहनिद्देसवण्णना

१०६. दातुं कामेतीति दातुकामो, तस्स अभिहारो ईसकम्पि ओणमनादिनाभिहरणन्ति तप्पुरिसो, हत्थस्स पासो **हत्थपासो**। रुळ्हीवसेन तु अड्ढतेय्यहत्थो हत्थपासो नाम। सो च सचे भिक्खु निसिन्नो होति, आसनस्स पच्छिमन्ततो पट्ठाय, सचे ठितो, पण्हिअन्ततो पट्ठाय, सचे निपन्नो, येन पस्सेन निपन्नो, तस्स पारिमन्ततो पट्ठाय दायकस्स निसिन्नस्स ठितस्स वा ठपेत्वा पसारितहत्थं यं आसन्नतरं अङ्गं, तस्स ओरिमन्तेन परिच्छिन्दित्वा वेदितब्बो। **एरणक्खम**न्ति थाममज्झिमेन पुरिसेन एरणस्स उक्खिपनस्स खमं योग्गं। वत्थुसद्दापेक्खं नपुंसकत्तं। **तिधा देन्ते**ति कायकायप्पटिबद्धनिस्सग्गियानं वसेन तीहि पकारेहि दायके ददमाने। तत्थ येन केनचि सरीरावयवेन अन्तमसो पादङ्गुलियापि दीयमानं कायेन दिन्नं नाम होति, कटच्छुआदीसु येन केनचि दीयमानं कायप्पटिबद्धेन, कायतो पन कायप्पटिबद्धतो वा मोचेत्वा हत्थपासे ठितस्स कायेन वा कायप्पटिबद्धेन वा पातियमानं निस्सग्गियेन पयोगेन दिन्नं नाम। **द्विधा गाहो**ति कायकायप्पटिबद्धानं वसेन द्वीहि पकारेहि येहि केहिचि दीयमानस्स गहणं। एवं पटिग्गहो पञ्चङ्गोति योजना। **पञ्चङ्गो**ति पञ्च अङ्गानि यस्साति बहुब्बीहि।

१०७. इदानि अनेरणक्खमे च किस्मिञ्चि कायप्पटिबद्धे च पटिग्गहणारोहनं दस्सेतुं **"असंहारिये"**तिआदिमाह। तत्थ **असंहारिये**ति आनेतुमसक्कुणेय्ये फलकपासाणादिम्हि। **तत्थजाते**ति तेसुयेव रुक्खादीसु जाते किंसुकपदुमिनिपण्णादिके। चिञ्चआदीनं सुखुमे पण्णेति सम्बन्धो। तानि हि सन्धारेतुं न सक्कोन्ति। तेसं पन साखासु वट्टति। **आदि**-सद्देन "अङ्ग"न्तिआदिकं सङ्गण्हाति। **वा**-सद्दो समुच्चये। **असय्हभारे**ति थाममज्झिमपुरिसेन सहितुं सन्धारेतुं असक्कुणेय्ये भारे। सब्बेसं पटिग्गहो "न रूहती"ति इमिना सम्बन्धो।

१०८. इदानि पटिग्गहणविजहनं दस्सेति **"सिक्खा"**तिआदिना। तत्थ **सिक्खामरणलिङ्गेही**ति सिक्खापच्चक्खानेन च मरणेन च लिङ्गपरिवत्तनेन च। **अनपेक्खविसग्गतो**ति नत्थि अपेक्खो एतस्साति अनपेक्खो, सोव विसग्गो, ततो च। **अच्छेदा**ति चोरादीहि अच्छिन्दित्वा गहणेन। **अनुपसम्पन्नदाना**ति अनुपसम्पन्नस्स दानेन। **च**-सद्दो सब्बत्थ आनेतब्बो। **गाहो**ति पटिग्गहणं। **उपसम्मती**ति विजहति।

१०९-१०. इदानि अप्पटिग्गहितं परिभोगे दोसं दस्सेतुं **"अप्पटिग्गहित"**न्तिआदिमाह। तत्थ **सब्ब**न्ति चतुकालिकपरियापन्नं सकलम्पि। इदानि अप्पटिग्गहेत्वा परिभुञ्जितब्बं दस्सेतुं **"सुद्ध"**न्तिआदिमाह। तत्थ सुद्धं

नातिबहलं उदकञ्च तथा अङ्गलग्गं अविच्छिन्नं दन्त...पे०... गूथकञ्च लोण...पे०... करीसकञ्च कप्पतेति सम्बन्धो। तत्थ **सुद्ध**न्ति रजरेणूहि अञ्ञरसेन च असम्मिस्सताय परिसुद्धं। **नातिबहल**न्ति यं कसितट्ठाने बहलमुदकं विय मुखे वा हत्थे वा न लग्गं, तं। **अविच्छिन्न**न्ति अङ्गतो विच्छिन्दित्वा न गतं। दन्तानि च अक्खीनि च कण्णञ्च दन्तक्खिकण्णं पाण्यङ्गत्ता, तस्स गूथकन्ति तप्पुरिसो। **लोणं** सरीरुट्ठितं। **सिङ्घाणी**ति सिङ्घाणिका। विच्छिन्नं न पटिग्गहेतब्बं।

१११. इदानि **''गूथा''**तिआदिना कालोदिस्सं दस्सेति। **तथाविधे**ति सप्पदट्ठक्खणादिके तथाविधे काले। तथा तादिसो विधो कालो एतस्साति बहुब्बीहि। **सेवेय्या**ति सेवनं करेय्य, परिभुञ्जेय्याति वुत्तं होति। **असन्ते कप्पकारके**ति एत्थ दुब्बचोपि असमत्थोपि कप्पियकारको असन्तपक्खेयेव तिट्ठतीति वेदितब्बो। कालोदिस्सत्ता पन छारिकाय असति अल्लदारुं रुक्खतो छिन्दित्वा कातुं, मत्तिकाय असति भूमिं खणित्वापि मत्तिकं गहेतुं वट्टति।

११२. **दुरूपचिण्णे**ति दुट्ठं उपचिण्णं आमट्ठं दुरूपचिण्णं। सचे भिक्खु अप्पटिग्गहितं सामिसं भाजनं ठितट्ठानतो अपनेत्वा आमसति, पिधानं आमसति, उपरि ठितकचवरादिं छड्डेति, तत्थजातकफलिनिया साखाय वा वल्लिया वा गहेत्वा वा चालेति, दुरूपचिण्णं नाम होति। तस्मिं दुक्कटन्ति सम्बन्धो। फलरुक्खं पन अपस्सयितुं वा तत्थ कण्टकं वा बन्धितुं वट्टति। अरञ्ञे पतितअम्बफलादिं ''सामणेरस्स दस्सामी''ति आहरित्वा दातुं वट्टति। **रजोकिण्णे**ति रजसा ओकिण्णे, तस्मिं पत्तादिके यं किञ्चि पटिग्गण्हतो विनयदुक्कटं होतीति अत्थो। सचे पिण्डाय चरन्तस्स पत्ते रजं पतति, पटिग्गहेत्वा भिक्खा गण्हितब्बा। ''पटिग्गहेत्वा देथा''ति वुत्तेपि आकिरन्ति, हत्थतो अमोचेन्तेनेव पटिग्गाहापकस्स सन्तिकं नेत्वा पटिग्गहेतब्बं। सचे महावातो ततो ततो रजं पातेति, न सक्का होति भिक्खं गहेतुं, ''अनुपसम्पन्नस्स दस्सामी''ति सुद्धचित्तेन आभोगं कत्वा गण्हितुं वट्टति। तं पन तेन दिन्नं वा विस्सासेन वा पटिग्गहेत्वा परिभुञ्जितुं वट्टति।

अथाति वक्खमानारम्भे। **उग्गहप्पटिग्गहे**ति उग्गहित्थाति उग्गहो, उग्गहितं, तस्स पटिग्गहो, तस्मिं। अप्पटिग्गहितभावं जानतो अत्तना एव उग्गहेत्वा गहणेति अधिप्पायो। मातापितूनं अत्थाय पन अप्पटिग्गहेत्वा तेलादीनि, छायत्थाय साखादीनि वा गहेत्वा पच्छतो भुञ्जितुकामताय पटिग्गहेत्वा परिभुञ्जितुं वट्टति। उच्छुआदीसु फालितेसु मलं न पञ्ञायति, मूलभेसज्जादीनि पिसन्तानं वा कोट्टेन्तानं वा निसदनिसदपोतकउदुक्खलमुसलानि खीयन्ति, दन्तन्तरे लग्गं सुखुमआमिसं होति, रसो न पञ्ञायति, अब्बोहारिकं। **अन्तोवुत्थे**ति अकप्पियकुटिया छदनब्भन्तरे वुत्थेति अत्थो। **सयंपक्के**ति अत्तना यत्थ कत्थचि पक्के। सचे वासिआदिं तापेत्वा तक्कादीसु पक्खिपति, एत्तावतापि सामपाकतो न मुच्चति। पुरिमकालिकद्वये पुनपाकञ्हि ठपेत्वा यं किञ्चि आमिसं भिक्खुनो पचितुं न वट्टति। सचेपिस्स उण्हयागुया सुलसिपण्णादीनि वा सिङ्गिवेरं वा पक्खिपन्ति, चालेतुं न वट्टति। उत्तण्डुलं भत्तं लभित्वा पिदहितुं न वट्टति। **अन्तोपक्के**ति अकप्पियकुटिया अन्तो पक्के। सब्बत्थ दुक्कटन्ति सम्बन्धो।

पटिग्गाहनिद्देसवण्णना निट्ठिता।

१०. अकप्पियमंसनिद्देसवण्णना

११३-४. मनुस्सहत्थिअस्सानञ्च ...पे०... उरगस्स च यं मंसञ्च, यं उद्दिस्सकतमंसञ्च, अप्पटिवेक्खितं यञ्च मंसं, तेसु मंसेसूति एवं योजेत्वा अत्थो वेदितब्बो। तत्थ सीसगीवातरङ्गेन चरन्ता अच्छविसेसाव **तरच्छा। उरगस्सा**ति इमिना सब्बापि दीघजाति सङ्गहिता। **उद्दिस्सकतमंस**न्ति भिक्खुं उद्दिसित्वा कतं उद्दिस्सकतं, तञ्च तं मंसञ्च। एत्थ च **मंस**-ग्गहणेन मच्छानम्पि गहणं वेदितब्बं उपलक्खणवसेन, च-सद्देन वा। पञ्चसुपि सहधम्मिकेसु यं किञ्चि उद्दिस्सकतं

सब्बेसम्पि न कप्पति, तम्पि अदिट्ठअसुतअपरिसङ्कितताय तिकोटिपरिसुद्धं वट्टति। **अप्पटिवेक्खित**न्ति अनुपपरिक्खितं, अनापुच्छितन्ति अत्थो। आपत्तिभीरुकेन हि रूपं सल्लक्खेन्तेनापि पुच्छित्वा पटिग्गहेतब्बं परिभुञ्जितब्बञ्च। मनुस्सानं मंसेसु थुल्लच्चयन्ति योजना। थूलो अच्चयो एत्थाति रस्से, द्वित्ते च **थुल्लच्चयं**। पाराजिकसङ्घादिसेसेहि ठपेत्वा इतो अधिकं वज्जं नत्थि। **सेसेसू**ति अवसेसेसु एकादससु।

११५. इदानि मनुस्सादीनं अट्ठिआदीनिपि अकप्पियानीति दस्सेतुं **''अट्ठिपी''**तिआदिमाह। **पि**-सद्दो ''लोहित''न्तिआदीसुपि अनुवत्तेतब्बो। **एस**न्ति मनुस्सादीनं दसन्नं। वसासु पन एका मनुस्सवसा न वट्टति। खीरादीसु अकप्पियं नाम नत्थि। उद्दिस्सकतंयेव सचित्तकन्ति योजना। **सचित्तक**न्ति उद्दिस्सकतभावजाननचित्तेन सह वत्ततीति सचित्तकं। वत्थुवीतिक्कमविजाननचित्तेन हि सचित्तकत्तं। एत्थ च सचित्तकत्तं आपत्तिया एव, न च मंसस्स, तथापि मंससीसेन आपत्ति एव वुत्ताति विञ्ञातब्बन्ति।

अकप्पियमंसनिद्देसवण्णना निट्ठिता।

११. निस्सग्गियनिद्देसवण्णना

११६-७. रूपियेन अरूपियं रूपियञ्च इतरेन रूपियञ्च परिवत्तेय्याति सम्बन्धो। तत्थ **रूपियेना**ति रूपियसङ्खातेन निस्सग्गियवत्थुना। **अरूपिय**न्ति अरूपियसङ्खातं दुक्कटवत्थुं कप्पियवत्थुञ्च। **इतरेना**ति अरूपियेन। **निस्सग्गी**ति निस्सज्जनं निस्सग्गो, पुब्बभागे कत्तब्बस्स विनयकम्मस्सेतं नामं। निस्सग्गो अस्स अत्थीति निस्सग्गि, किं तं? पाचित्तियं। रूपियस्स मूलग्गहणे पन रूपियप्पटिग्गहणसिक्खापदेन निस्सग्गियं पाचित्तियं।

इदानि रूपियादिं दस्सेतुं **''इधा''**तिआदि आरद्धं। तत्थ कहा...पे०... मासकं इध रूपियन्ति सम्बन्धो। तत्थ **कहापणो** नाम सुवण्णमयो वा रजतमयो वा एतरहि पकतिकहापणो वा। **सज्झू**ति रजतं। **सिङ्गी**ति सुवण्णभेदो, तथापि चेत्थ सामञ्ञेन सुवण्णमधिप्पेतं। **वोहारूपगमासक**न्ति वोहारं कयविक्कयं उपगच्छतीति वोहारूपगं, तञ्च तं मासकञ्च। तं पन समुट्ठापितरूपञ्च असमुट्ठापितरूपञ्च लोहदारुआदिमयं वुच्चति। **इध रूपिय**न्ति इमस्मिं सिक्खापदे रूपियं नामाति अत्थो। वत्थमुत्तादि कप्पं दुक्कटवत्थुञ्च इतरन्ति योजना। तत्थ वत्थञ्च मुत्ता च आदि यस्साति समासो। **आदि**-सद्दो पच्चेकं योजेतब्बो ''वत्थादि मुत्तादी''ति। तत्थ पठमेन **आदि**-सद्देन कप्पाससुत्तापरण्णादिकं यं किञ्चि कप्पियवत्थुं, दुतियेन मणि सङ्खो सिला पवाळं लोहितङ्को मसारगल्लं सत्तधञ्ञानि दासिदासखेत्तवत्थुपुप्फारामफलारामादयोति इदं दुक्कटवत्थुं सङ्गण्हाति। वत्थादिकप्पियवत्थुं, मुत्तादिदुक्कटवत्थुञ्च इतरं अञ्ञं अरूपियं नामाति अत्थो।

११८. एत्तावता रूपियसंवोहारं दस्सेत्वा इदानि कप्पियभण्डे कयविक्कयं दस्सेतुमाह **''इम''**न्तिआदि। तत्थ ''इमं गहेत्वा इमं देहि, इमं कर, इमं आनया''ति वा ''इमं भुत्वा इमं देहि, इमं कर, इमं आनया''ति वा ''इमं देमि, इमं देहि, इमं कर, इमं आनया''ति वा कयविक्कये समापन्ने निस्सग्गीति योजना। तत्थ **इम**न्ति तण्डुलादिं। **भुत्वा**ति ओदनादिं भुञ्जित्वा। **इमं देही**ति एतं वत्थादिकं देहि। **इमं करा**ति एतं रजनपचनादिं करोहि। **इमं आनया**ति एतं रजनकट्ठादिं आनेहि। **इमं देमी**ति एतं वत्थादिकं तव देमि। **समापन्ने**ति कते। तस्मा कप्पियं भण्डं परिवत्तेन्तेन अञ्ञातकेहि सद्धिं ''इमं देही''ति वदतो विञ्ञत्ति, ''इमं गण्हाही''ति वदतो सद्धादेय्यविनिपातनं, ''इमिना इमं देही''ति वदतो कयविक्कयन्ति वुत्ता तिस्सो आपत्तियो। मातापितूहि पन सद्धिं कयविक्कयमत्तं मोचेन्तेन परिवत्तेतब्बं। अयञ्हि कयविक्कयो ठपेत्वा पञ्चसहधम्मिके अवसेसेहि गिहिपब्बजितेहि न वट्टति। सचे पन नवकम्मानि कारेति, अट्ठकथापमाणेन पाचित्तियमत्तं

देसेतब्बं।

११९-१२०. इदानि परिणामनवसेन आपत्तिभेदं दस्सेतुं **''अत्तनो''**तिआदि आरद्धं। तत्थायं पिण्डत्थो – सङ्घस्स नतं लाभं अत्तनो परिणामेय्य, निस्सग्गि। अञ्‍ञतो पुग्गलस्स परिणामेय्य, पाचित्ति। अञ्‍ञस्स सङ्घस्स वा चेतियस्स वा परिणामेय्य, दुक्कटं। अञ्‍ञस्स पुग्गलस्स वा चेतियस्स वा नतं लाभं अत्तनो वा सङ्घस्स वा अञ्‍ञपुग्गलस्स वा अञ्‍ञचेतियस्स वा परिणामेय्य, दुक्कटन्ति योजना। तत्थ **नत**न्ति कायेन वा वचसा वा निन्नं कतं। **लाभ**न्ति लभितब्बं चीवरादि। **अञ्‍ञतो** अञ्‍ञस्मिं पुग्गले वा चेतिये वा, चेतिये पन दुक्कटं। **अञ्‍ञस्सा**ति चेतियादिनो अन्तमसो सुनखस्स। **अञ्‍ञतो वा**ति चेतियादिम्हि वा। **सङ्घस्सा**ति पन इदं काकक्खिगोळकञायेन ''नतं परिणामेय्या''ति उभयत्थ परिवत्तति। निस्सट्ठं सकसञ्‍ञाय न ददेय्य वा, दुक्कटन्ति सम्बन्धो। **अञ्‍ञथा** अञ्‍ञेन पकारेन, थेय्यसञ्‍ञाय न ददेय्य चेति वुत्तं होति। **इतर**न्ति वत्थुवसेन अञ्‍ञं पाराजिकं थुल्लच्चयं दुक्कटञ्‍च होतीति अत्थो।

निस्सग्गियनिद्देसवण्णना निट्ठिता।

१२. पाचित्तियनिद्देसवण्णना

१२१. **मुसा ...पे०... हरणे**ति निमित्तत्थे भुम्मवचनं, तस्स ''पाचित्ति वुत्ता''ति इमिना सम्बन्धो। एवं सब्बत्थ। **मुसावादे**ति निपातेन सद्धिं तप्पुरिसो। पुब्बेपि जानित्वा वचनक्खणेपि जानन्तस्स मुसाभणननिमित्तन्ति अत्थो। **भणन**ञ्‍च नाम इध अभूतस्स वा भूततं, भूतस्स वा अभूततं कत्वा कायेन वा वाचाय वा विञ्‍ञापनप्पयोगो। पाराजिकसङ्घादिसेसाचारविपत्तियो अमूलिकाय चोदेन्तस्स यथाक्कमं सङ्घादिसेसपाचित्तियदुक्कटानि। अनुपधारेत्वा सहसा भणन्तस्स, ''अञ्‍ञं भणिस्सामी''ति अञ्‍ञं भणन्तस्स यस्स भणति, सो न सुणाति, तस्स च अनापत्ति।

ओमसति अमनापताय कण्णेसु विज्झति विय एतेन, ओमसति वाति **ओमसो,** सो चायं वादोच, तस्मिं। दीघो पन गाथाबन्धवसेन। एवं सब्बत्थ। हीनुक्कट्ठेसु च जातिनामगोत्तवयकम्मसिप्पआबाधलिङ्गकिलेसआपत्तिअक्कोससङ्खातेसु दससु भूतेन वा अभूतेन वा ''खत्तियोसि, चण्डालोसी''तिआदिना कायेन वा वाचाय वा अनञ्‍ञापदेसेन भिक्खुनो खुंसेतुकामताय अक्कोसवचनेति अत्थो। ''सन्ति इधेकच्चे चण्डाला''तिआदिना अञ्‍ञापदेसेन वा ''चोरोसि, विकारीसि, मातुघातकोसी''तिआदीहि पाळिमुत्तपदेहि वा भिक्खुस्स, यथा वा तथा वा अनुपसम्पन्नं, परम्मुखा पन सब्बम्पि अक्कोसन्तस्स दुक्कटं। केवलं दवकम्यताय वदतो पन सब्बत्थ दुब्भासितं।

पेसुञ्‍ञहरणेति पिसुणस्स भावो पेसुञ्‍ञं। अत्तनो पियकम्यताय वा परस्स परेसु भेदाधिप्पायेन वा जातिआदीहि ओमसन्तस्स भिक्खुनो वचनं सुत्वा भिक्खुस्स तस्स पेसुञ्‍ञस्स हरणे। अनुपसम्पन्नस्स हरणे दुक्कटं। पदं पदं **पदसो,** विच्छायं सो, कोट्ठासेन कोट्ठासेनाति अत्थो। सङ्गीतित्तयारुळ्हो तिपिटकधम्मो, अनारुळ्हो च राजोवादादिको **धम्मो** नाम, तेन सह पदसोति निपातस्स ततियातप्पुरिसो। **पदसोधम्मे**ति एकक्खरादिना कोट्ठासेन कोट्ठासेन अनुपसम्पन्नेन सद्धिं यथावुत्तधम्मभणनेति अत्थो। पदसोधम्मभणनञ्हि पदसोधम्म-सद्देन उपचारेन वुत्तं। अनुपसम्पन्नेन सद्धिं एकतो उद्देसग्गहणे सज्झायकरणे, तंसन्तिके उद्देसग्गहणादिके च तेन सद्धिं एकतो येभुय्येन पगुणं गन्थं भणन्तस्स ओसारेन्तस्स खलितट्ठाने ''एवं भणाही''ति एकतो भणन्तस्सपि अनापत्ति।

अन्तमसो वत्थादिना येन केनचि सब्बच्छन्नं छदनं अनाहच्च दियड्ढहत्थुब्बेधेनापि सब्बपरिच्छिन्नं येभुय्येनछन्नं

येभुय्येनपरिच्छिन्नञ्च सेनासनं अगारन्ति अधिप्पेतं। तत्रट्ठो पन भिक्खुं ठपेत्वा अन्तमसो पाराजिकवत्थुभूतो तिरच्छानगतोपि अन्तमसो तदहुजाता इत्थीपि उपचारतो अगार-सद्देन वुच्चति। सह अगारेनाति **सागारो,** भिक्खु। उपचारेनेव च पन अनुपसम्पन्नेन, मातुगामेन च सह सेय्यकप्पनं सागारभावो नामाति गहेतब्बं। सङ्घसम्मतं सेनासनपञ्ञापकादिभेदं उपसम्पन्नं अयसकामा हुत्वा भिक्खूहि येन च उज्झापेन्ति अवजानापेन्ति अवञ्ञाय ओलोकापेन्ति, लामकतो वा चिन्तापेन्ति, तं वचनं **उज्झापनकं**। येन खीयन्ति सब्बत्थ तस्स अवण्णं पकासेन्ति, तं **खीयनं**।

१२२. **तल**न्ति हत्थतलमधिप्पेतं। तग्गहणेन पन कायोव तलं। **सत्ती**ति कायप्पटिबद्धा सत्ति आवुधविसेसो, उपलक्खणत्ता पन सब्बम्पि कायप्पटिबद्धं सत्ति। तलञ्च सत्ति च **तलसत्ति**। इध पन कोपेन भिक्खुस्स तलसत्तिउग्गिरणं तलसत्ति। सचे पन विरद्धो पहारं देति, न पहरितुकामताय दिन्नत्ता दुक्कटं, पहरितुकामताय पाचित्तियं, अनुपसम्पन्ने दुक्कटं, मोक्खाधिप्पायस्स अनापत्ति।

पञ्ञत्तेन वदतो उपसम्पन्नस्स वा तेन वुच्चमानधम्मस्स वा अनादरकरणं **अनादरो**। अनुपसम्पन्नस्स तेन वुच्चमानस्स वा उपसम्पन्नेन, परेन वा अपञ्ञत्तेन वा वुच्चमानस्स अनादरे दुक्कटं।

''ऊनवस्सो त्वं मञ्ञे''तिआदिना भिक्खुनो कुक्कुच्चस्स उप्पादनं अनुपसम्पन्नस्स दुक्कटं।

अनापुच्छा गामप्पवेसनेति पकतिवचनेन पुच्छितुमनुरूपं अन्तोउपचारसीमाय दस्सनूपचारे भिक्खुं दिस्वा ''विकाले गामप्पवेसनं आपुच्छामी''ति अनापुच्छित्वा विकाले गामप्पवेसने। दीघो पन सन्धिवसेन। आपदासु अनापत्ति।

परम्परभोजनेति परो च परो च परम्परा म-कारो सन्धिवसेन, तस्मा परम्परा उप्पत्तविसयअपादानवचनं, परतो परतो लद्धा भुञ्जनेति अत्थो। अयमेत्थ अधिप्पायो – पञ्चहि भोजनेहि नामं गहेत्वा निमन्तितस्स येन येन पठमं निमन्तितो, तस्स तस्स भोजनतो उप्पटिपाटिया, ''मय्हं भत्तपच्चासं तुय्हं दम्मी''ति वा ''विकप्पेमी''ति वा आदिना सम्मुखा वा परम्मुखा वा अविकप्पेत्वा वा अञ्ञतो अञ्ञतो पञ्चभोजनादीनि लद्धा भुञ्जमानेति। गिलानचीवरदानचीवरकारसमये अनापत्ति।

१२३. सेय्यं सेनासनानि वा अनुद्धरित्वा गमनेति सम्बन्धो। **वा**-सद्दो समुच्चये। तत्थ ''भिसि चिमिलिका उत्तरत्थरणं भूमत्थरणं तट्टिका चम्मक्खण्डो निसीदनं पच्चत्थरणं तिणसन्थारो पण्णसन्थारो''ति (पाचि० ११६) वुत्तासु दससु सेय्यासु एकम्पि अत्तनो वस्सग्गने गहेत्वा सङ्घिके सब्बप्पटिच्छन्ने गुत्ते सेनासने सन्थरित्वा वा सन्थरापेत्वा वा यथा ठपितं उपचिकादीहि न खज्जति, तथा ठपनवसेन अनुद्धरित्वा परिक्खित्तस्स आरामस्स परिक्खेपं, अपरिक्खित्तस्स उपचारं अतिक्कमित्वा गमने च, तथा मञ्चपीठतिसिकोच्छसङ्खातानि सेनासनानि वस्सकाले अज्झोकासे सन्थरित्वा वा सन्थरापेत्वा वा अनुपसम्पन्नेन अनुद्धरित्वा थाममज्झिमस्स पुरिसस्स लेड्डुपातं अतिक्कमित्वा गमने चाति अत्थो। यथावुत्ततो पन अञ्ञत्थ दुक्कटं।

इत्थिया अद्धानगमनेति ''गच्छाम भगिनि, गच्छाम अय्या''ति अञ्ञमञ्ञं संविदहित्वा ''अज्ज वा स्वे वा''तिआदिना नियमितकालविसङ्केतं अकत्वापि द्वारविसङ्केतं मग्गविसङ्केतं कत्वापि इत्थिया सद्धिं अद्धानमग्गगमनेति अत्थो।

एकेकाय निसीदनेति एकेन एकाति एकेका, तस्सा निसज्जायाति अत्थो। एकेन सह एकिस्सा निसज्जं विना एकाय सह एकस्स निसज्जं नाम नत्थीति एकाय सह एकस्स निसज्जायं सति निसिन्नस्स भिक्खुनो पाचित्तियन्ति अधिप्पायो। ''एकायेकनिसीदने''ति वा पाठो।

१२४. रूपादीनं उपसंहारेन, भयानककथाकथनेन वा उपसम्पन्नस्स **भिंसापने**। अनुपसम्पन्नस्स दुक्कटं।

आकोटने उपसम्पन्नस्स अन्तमसो उप्पलपत्तेनापि पहारदाने। अनुपसम्पन्नस्स अन्तमसो तिरच्छानगतस्सपि दुक्कटं। मोक्खाधिप्पायस्स अनापत्ति।

सङ्घमज्झे विनयधरेन अनुयुञ्जियमानस्स पुच्छिततो अञ्ञस्स वादो अञ्ञेन अञ्ञं पटिचरणं **अञ्ञवादो**। तथेव पुच्छियमानस्स अकथेतुकामताय विहेसनं तुण्हीभावो **विहेसा**। अञ्ञवादकस्स विहेसकस्स च ञत्तिदुतियकम्मेन अञ्ञवादकविहेसककम्मे कते पुन अञ्ञवादे विहेसाय पाचित्तियं। अनारोपिते पन कम्मे दुक्कटं। किञ्चि वीतिक्कमं दिस्वा ''आवुसो, इदं नाम तया कत''न्ति वुत्ते तं न कथेतुकामो तुण्हीभूतो सङ्घं विहेसेतीति **विहेसको**। अनाचारं आचरित्वा सङ्घमज्झे आपत्तिया, वत्थुना वा अनुयुञ्जियमाने तं अकथेतुकामो ''को आपन्नो, किस्मिं आपन्नो''तिआदिना नयेन अञ्ञेहि वचनेहि तं वचनं पटिच्छादेन्तो यो अञ्ञं वदति, अयं **अञ्ञवादको** नाम।

दुट्ठुल्लं नाम पाराजिकसङ्घादिसेसा, इध पन सङ्घादिसेसोव। पकासो च छादो च **पकासछादो,** दुट्ठुल्लस्स पकासछादोति तप्पुरिसो। अभिण्हापत्तिकस्स भिक्खुनो आयतिं संवरत्थाय आपत्तिपरियन्तं कुलपरियन्तञ्च कत्वा वा अकत्वा वा तिक्खत्तुं अपलोकेत्वा कातब्बं। भिक्खुसम्मुतिं ठपेत्वा अनुपसम्पन्नस्स ''अयं असुचिं मोचेत्वा सङ्घादिसेसं आपन्नो''तिआदिना नयेन वत्थुना सद्धिं आपत्तिं घटेत्वा तस्स दुट्ठुल्लस्स पकासने आरोचने च, तस्सेव येन केनचि उपायेन ञत्वा छादने च, अदुट्ठुल्लारोचने छादने च, अनुपसम्पन्नस्स पन पुरिमपञ्चमसिक्खापदे इतरा दुट्ठुल्लेपि दुक्कटं।

हासोदकेति एत्थ हासे उदकेति पदविभागो वेदितब्बो। येन केनचि सरीरावयवेन हसाधिप्पायस्स उपकच्छकादीसु हासे फुसने। हासनिमित्तञ्हि फुसनं हासो। अनुपसम्पन्ने दुक्कटं। **उदके हासे**ति उपरिगोप्फके उदके हसाधिप्पायस्स उम्मुज्जननिमुज्जनेन कीळाय। कीळा हि इध हासोति वुत्तो। नावाय कीळतो, हत्थादिना कट्ठादिना वा उदकं हनतो अन्तमसो भाजनगतकञ्जिकादीनिपि खिपनकीळाय कीळतो दुक्कटं। अहसाधिप्पायस्स अनापत्ति।

निच्छुभने विहाराति सङ्घिकविहारतो भिक्खुनो निक्कड्ढननिक्कड्ढापने। एत्थ च एकप्पयोगे एका, नानापयोगे द्वारगणनाय आपत्तियो। पुग्गलिकनिक्कड्ढने, तस्स परिक्खारनिक्कड्ढने, अनुपसम्पन्नस्स पन तस्स परिक्खारस्स वा निक्कड्ढने दुक्कटं। न सम्मावत्तन्तानं अन्तेवासिकसद्धिविहारिकानं वा निक्कड्ढने, अत्तनो विस्सासिकस्स विहारा निक्कड्ढने, भण्डनकारकस्स पन सकलसङ्घारामतो निक्कड्ढने अनापत्ति।

अनुपखज्ज सयनेति ''वुड्ढो, गिलानो, सङ्घेन दिन्नो''ति जानित्वा मञ्चपीठानं वा तस्स भिक्खुनो पविसन्तस्स वा निक्खमन्तस्स वा उपचारं अनुपखज्ज अनुपविसित्वा सङ्घिके विहारे ''यस्स सम्बाधो भविस्सति, सो पक्कमिस्सती''ति अधिप्पायेन निसीदननिसज्जनवसेन सयने। पुग्गलिके दुक्कटं।

एत्थ च **पाचित्ती**ति उद्दिसित्वा कानिचि पसिद्धानि दस्सितानि। अवुत्तानि पन तादिसानि इमिनाव सामञ्ञवचनेन

सङ्गहेत्वा वेदितब्बानि। कथं? अचेलकादिअञ्ञतित्थियानं यस्स कस्सचि आमिसस्स सहत्था दाने च, सप्पिनवनीततेलमधुफाणितमच्छमंसखीरदधिसङ्खातानं पणीतभोजनानं अत्तनो अत्थाय विञ्ञापेत्वा भुञ्जने, रागपरियुट्ठितइत्थिपुरिसस्स योग्गे कुले अनुपविसित्वा निसज्जनकप्पने, पञ्चन्नं भोजनानं अञ्ञतरेन निमन्तितो तस्मिं भुत्ते वा अभुत्ते वा सन्तं भिक्खुं अनापुच्छित्वा पुरेभत्तं पच्छाभत्तं वा यस्मिं कुले निमन्तितो, ततो गिलानचीवरदानकारसमयं ठपेत्वा अञ्ञस्मिं अञ्ञकुलप्पवेसने, ठपेत्वा एकदिवसं अञ्ञस्मिं दिने आवसथपिण्डस्स अगिलानेन हुत्वा भुञ्जने, रत्तिपरिच्छेदं वा भेसज्जपरिच्छेदं वा कत्वा पवारिततो उत्तरि अञ्ञत्र पुन पवारणाय अञ्ञत्र निच्चप्पवारणाय विञ्ञापने, अञ्ञत्र तथारूपपच्चया गामतो निक्खन्तसेनादस्सनाय गमने, पच्चयेनपि गन्त्वा तिरत्ततो उत्तरि सेनाय वासे, तस्स च वसन्तस्स युद्धट्ठानबलगणट्ठानसेनानिवेसअनीकदस्सनत्थं गमने, पिट्ठादीहि कतमज्जसङ्खातसुराय, पुप्फादीहि कतआसवसङ्खातमेरयस्स च पाने, पदीपुज्जलपत्तपचनादिकारणं विना विसिब्बितुकामताय अगिलानस्स अग्गिनो जालनजालापने, कप्पबिन्दुं अनादाय नवचीवरपरिभोगे, सामं चीवरं विकप्पेत्वा अपच्चुद्धाय परिभोगे, भिक्खुसन्तकपत्तादिनो अन्तमसो हसाधिप्पायेनपि अपनिधाने अपनिधापने, सञ्चिच्च तिरच्छानगतस्स जीवितवोरोपने, सञ्चिच्च यथाधम्मं निहताधिकरणस्स पुनकम्माय उक्कोटने, सञ्चिच्च थेय्यसत्थेन सद्धिं संविधाय एकद्धानगमने, भिक्खूहि सिक्खापदेहि वुच्चमानस्स अञ्ञं अविचारेत्वा ''न तत्थ सिक्खिस्सामी''ति भणने, सिक्खापदविवण्णने, इमेसं ''सुत्वा ओरमिस्सामी''ति अधिप्पायं विना विवादापन्नानं उपस्सुतिट्ठाने, धम्मिकानं कम्मानं छन्दं दत्वा पच्छा खीयनधम्मापज्जने, सङ्घे विनिच्छये वत्तमाने छन्दं अदत्वा पक्कमने, समग्गेन सङ्घेन चीवरं दत्वा पच्छा खीयनधम्मापज्जने, अञ्ञत्र अज्झारामा अज्झावसथा वा रतनस्स वा रतनसम्मतस्स वा उग्गण्हनउग्गहापने पाचित्तियन्ति।

पाचित्तियनिद्देसवण्णना निट्ठिता।

१३. समणकप्पनिद्देसवण्णना

१२५. **समणकप्पा**ति समणवोहारा। भवन्ति, अहेसुन्ति वा भूता, वत्तमाने, भूते वा तप्पच्चयो। विरुळ्हमूलादिभावं आपज्जित्वा वड्ढमानकानं, वड्ढित्वा महन्तभावं पत्तानञ्च रुक्खलतादिसङ्खातानं भूतानं गामो, भूता एव वा गामो समूहो **भूतगामो**। तस्स समारम्भो छेदनफालनादि, तस्मिं। निमित्तत्थे चेतं भुम्मं, तंहेतु पाचित्तियं होतीति अत्थो। कतकप्पियं समणकप्पियं भवेति सम्बन्धो। तत्थ कतं कप्पियं यस्साति बहुब्बीहि। केनाति आह **''नखेना''**तिआदि।

१२६. इदानि यस्स समारम्भो, तं भूतगामं विभजित्वा दस्सेतुं **''स मूला''**तिआदि आरद्धं। **सो**ति भूतगामो। भवितुं उप्पज्जितुं पयोजेतीति कारितन्ता तप्पच्चयो, पभावितो उप्पादितोति अत्थो। अथ वा पभवनं पभवो, उप्पत्ति, सोव पभवो, पभावं करोतीति नामधातुतो कत्तरि तप्पच्चयो, पभावितो उप्पन्नोति अत्थो। मूलञ्च खन्धो च बीजञ्च अग्गञ्च फळु च मूल...पे०... फळूनि। **फळु** नाम पब्बं। तानियेव बीजानि, तेहि पभावितो उप्पादितो, अथ वा तेहि अवधिभूतेहि, कारणभूतेहि वा पभावितो उप्पन्नोति कमेन विकप्पद्वये समासद्वयं वेदितब्बं। तत्थ **मूलबीजं** नाम हलिद्दिसिङ्गिवेरादि।

खन्धबीजं नाम अस्सत्थनिग्रोधादि। **बीजबीजं** नाम पुब्बण्णापरण्णादि। **अग्गबीजं** नाम हिरिवेरादि। **फळुबीजं** नाम उच्छुनळादि। तत्थ मूलबीजादीनि पञ्च बीजगामो। तन्निब्बत्तो रुक्खलतादि भूतगामो।

इदानि तेसु बीजगामसमारम्भे दुक्कटं दस्सेति अपरद्धेन। भूतगामवियोजितं बीजं आरम्भे दुक्कटन्ति सम्बन्धो। भूतगामतो वियोजितन्ति तप्पुरिसो। **बीज**न्ति भूमियं रोपितमरोपितम्पि निग्गतविदत्थिमत्तपत्तवट्टिपि मूलबीजानि।

''आरम्भे''ति कितकपच्चयस्स योगे अवुत्ते कम्मनि छट्ठुप्पत्तियं विकप्पेन उभयत्थ दुतिया। **आरम्भे**ति समारम्भे। तस्मा ''इमं पुप्फं फलं वा जान, इमं कप्पियं करोही''तिआदिना कप्पियवचनेन भूतगामतो वियोजितं बीजजातं बीजगामपरिमोचनत्थं पुन कप्पियं कारापेत्वा परिभुञ्जिभब्बं। ''अनुजानामि, भिक्खवे, पञ्चहि समणकप्पेहि फलं परिभुञ्जितुं अग्गिपरिजितं सत्थपरिजितं नखपरिजितं अबीजं निब्बत्तबीजञ्ञेव पञ्चम''न्ति (चूळव० २५०) वुत्तेसु पञ्चसु नखपरिजितादीनि तीणि दस्सितानि।

१२७. इदानि अवसिट्ठानि द्वे दस्सेतुं **''निब्बत्तबीज''**न्तिआदिकं पठमड्ढं आह। तत्थ **निब्बत्तबीज**न्ति निब्बत्तनियन्ति निब्बत्तं, निपुब्ब वतु वत्तनेतिमस्मा तप्पच्चयो, निब्बत्तं बीजं यस्स तं निब्बत्तबीजं, बीजं निब्बत्तेत्वा विसुं कत्वा परिभुञ्जितब्बं अम्बपनसादि। **नोबीजं** नाम तरुणम्बफलादि। इदानि बीजगामभूतगामेसु कप्पियकरणप्पकारादिविसेसं दस्सेन्तो **''कटाहा''**तिआदिमाह। तत्थ कटाहेन बद्धं बीजं येसन्ति बाहिरत्थो।

१२८. भाजने भूमियम्पि वा एकाबद्धेसु बीजेसु एकस्मिञ्च कप्पिये कतेति योजना। **बीजेसू**ति बीजगामभूतगामेसु। भूतगामोपि हि इध ''बीज''न्ति रुळ्हीवसेन वुच्चति।

१२९. **निक्खित्ते**ति ठपिते। **कप्पियं पुन करेय्या**ति जातमूलपण्णभावतो भूतगामत्ता भूतगामतो परिमोचितं बीजगामपरिमोचनत्थं पुन कप्पियं कारेय्याति अत्थो। तेनाह **''भूतगामो हि सो तदा''**ति। **हि**-सद्दो हेतुम्हि। **तदा**ति मूले च पण्णे च जातकाले सचे मूलमत्तं सञ्जायति, उपरिभागे सचे अङ्कुरो जायति, हेट्ठाभागे छिन्दितुं वट्टति। मूलमत्तेसु वा पन पण्णमत्तेसु वा निग्गतेसु सचेपि रतनप्पमाणापि साखा निक्खमन्ति, बीजगामसङ्गहिता होन्ति।

१३०. उदकसम्भवो सेवालो च चेतियादीसु सेवालो च भूतगामोवाति सम्बन्धो। **आदि**-सद्देन पाकारादिग्गहणं। यदि द्वे तीणि पण्णानि न जायन्ति, अग्गबीजसङ्गहं गच्छति। सुक्खो पन सम्मज्जितब्बो। मूलपण्णे विनिग्गते बीजोपि भूतगामोवाति सम्बन्धो। **पण्णे**ति इमिना अङ्कुरमत्तं पटिक्खिपति।

१३१. घटादिपिट्ठे सेवालो च अहिछत्तकमकुळञ्च दुक्कटस्सेव वत्थूनीति सम्बन्धो। **पिट्ठे**ति इमिना अन्तो अब्बोहारिकोति दस्सेति। **फुल्ल**न्ति फुल्लितं अहिछत्तकं। **अब्यवहारिक**न्ति आपत्तिवोहारयोग्गं न होतीति अत्थो।

१३२. अल्लरुक्खे लाखानिय्यासछत्तानि विकोपिय गण्हतो तत्थ अक्खरं छिन्दतो वापि पाचित्तीति सम्बन्धो। **तत्था**ति अल्लरुक्खे। ''विकोपय''न्ति पोत्थकेसु पाठो दिस्सति, सो अपाठो पठमन्तताय कारणाभावतो। ''विकोपिया''ति पन पाठो गहेतब्बो। **विकोपिया**ति इमिना अविकोपेत्वा गहणे अनापत्तीति दीपेति।

१३३. **दारुमक्कटकादिना**ति आणिं कोट्टेत्वा दारुयन्तं कत्वा तत्थ कण्टकं ओलम्बेन्ति, एतं दारुमक्कटकं नाम। **आदि**-सद्देन कण्टकबन्धनादीनं गहणं। तिणादिं छिन्दितुं, गण्ठिकं कातुञ्च न कप्पतीति योजना। **छिन्दितु**न्ति छिन्दनं।

१३४. **भूतगामं वा**ति भूतगामं वा। **बीजं वा**ति बीजगामं वा। ''छिन्द वा''तिआदिना सब्बत्थ **वा**-सद्दो योजेतब्बो। **पच वा**ति पचनं करोहीति वा। ''पट'' इति वा पाठो, तस्स उप्पादेहीति अत्थो। ''इमं रुक्खं छिन्दाही''तिआदिना पन अवत्वा ''रुक्खं छिन्दा''तिआदिना अनियमेत्वा वत्तुं वट्टति।

१३५. **इम**न्ति एतं रुक्खादिं। **इमं सोधेही**ति एत्थ इति-सद्दं कत्वा अत्थो वत्तब्बोति।

समणकप्पनिद्देसवण्णना निट्ठिता।

१४. भूमिनिद्देसवण्णना

१३६. यासु वुत्थं पक्कञ्च कप्पति, ता कप्पिया भूमियो सम्मुति च सम्मुतिकुटि च...पे०... गहपति च गहपतिकुटि चाति इमा चतस्सो होन्तीति योजेत्वा अत्थो वेदितब्बो। तत्थ **भेसज्जक्खन्धके** (महाव० २९५) वुत्ताय उत्तिदुतियकम्मवाचाय, अपलोकनकम्मवसेन वा सावेत्वा सम्मा उत्तिसम्पन्नं करीयतीति **सम्मुति,** थम्भानं भित्तिपादानं वा उग्गमनं उद्धं कत्वा ठपनं, ''कप्पियकुटिं करोमा''ति वाचाय सावनञ्च अन्तं यस्सा सा **उस्सावनन्ता**। तथा च वुत्तं ''थम्भप्पतिट्ठानञ्च वचनपरियोसानञ्च समकालं वट्टती''ति (महाव० अट्ठ० २९५)। निसादनं पविसनं सन्निवेसनं निसादो, गुन्नं विय निसादो एतिस्साति **गोनिसादि**। भिक्खुं ठपेत्वा सेससहधम्मिका सब्बे च देवमनुस्सा इध **गहपती**ति सामञ्ञेन अधिप्पेता। एत्थ पन गहपतिसम्बन्धिनी कुटि दीघेन गहपती।

''यं पन अकप्पियभूमियं सहसेय्यप्पहोनके गेहे वुत्थ''न्ति (महाव० अट्ठ० २९५) **अट्ठकथा**वचनतो यं सङ्घो आकङ्खति विहारं वा अड्ढयोगं वा पासादं वा हम्मियं वा गुहं वा लेणादिं वा, तेसम्पि सामञ्ञवचनं विञ्ञायतीति तंतंलक्खणप्पत्ता सहसेय्यप्पहोनका लेणादयो चतूस्वेव कुटीसु अन्तोगधाति वेदितब्बं। इमासु चतूसु सहसेय्यप्पहोनके पदेसे यं सङ्घिकं पुग्गलिकं वा भिक्खुसन्तकं एकरत्तम्पि अन्तोवुत्थं अनुपसम्पन्नेन पक्कञ्च यावकालिकं यामकालिकञ्च अन्तोवुत्थअन्तोपक्कसङ्ख्यं न गच्छति, को पन वादो इतरद्वये। तं पन अकप्पियभूमियम्पि वुत्थं पक्कञ्च वट्टति। तेन वुत्तं **''यासु वुत्थं पक्कञ्च कप्पती''**ति।

१३७. वासत्थाय कते सङ्घिके वा एकसन्तके वा सहसेय्यप्पहोनके गेहे कप्पियाकुटि लद्धब्बाति सम्बन्धो। तत्थ **वासत्थाया**ति इमिना अवासत्थाय कतं निवत्तेति। **एकसन्तके**ति एकस्स भिक्खुनो सन्तके। **कप्पियाकुटी**ति भावप्पधानोयं निद्देसो, न हि गेहे गेहं लद्धुं युज्जतीति कप्पियकुटिताति अत्थो। दीघो पन गाथावसेन, कप्पिया कुटिताति वा विसेसनवसेन दट्ठब्बं। **सहसेय्यप्पहोनके**ति एत्थ सहसेय्यप्पहोनकं वासागारलक्खणे वुत्तलक्खणं सेनासनं।

१३८. इदानि ता कुटियो कमेन दस्सेत्वा तत्थ पटिपज्जितब्बविधिं, तासं सब्बथापगमञ्च दस्सेतुं **''गेहे''**तिआदिमाह। तत्थ ''कप्पियकुटिं करोम, कप्पियकुटिं करोमा''ति एवमीरयन्ति सम्बन्धो। इट्ठका च थम्भा च ''इट्ठकाथम्भा''ति वत्तब्बे रस्सो। इट्ठकथम्भा आदि यस्स भित्तिपासादस्साति बहुब्बीहि। पच्छा पठमसद्देन कम्मधारयो। ''ठपेय्य चे, सा उस्सावनन्तिका''ति एवं चे-सा-सद्दे योजेत्वा अत्थो वेदितब्बो।

१३९. सकलो अपरिक्खित्तो आरामोपि वाति सम्बन्धो। सेनासनं परिक्खित्तं वा होतु, अपरिक्खित्तं वा, न तं पमाणं।

१४०. अञ्ञेहि कप्पियकुटिया अत्थाय दिन्नो वा तेसं सन्तको वाति योजना।

१४१. अविरोधभावेन कप्पनीया कप्पा, कप्प सामत्थियमिच्चेतस्मा इत्थियं आपच्चये रूपं, न कप्पा अकप्पा, अकप्पा च सा कुटि चेति **अकप्पकुटि,** ताय। **सप्पिआदी**ति इमिना सत्ताहकालिकं यावजीविकञ्च गहितं।

१४२. **तेहेवा**ति अकप्पकुटियं वुत्थसप्पिआदीहि एव सद्धिं सत्ताहकालिकसंसट्ठताय **''सत्ताहं कप्पते''**ति वुत्तं। **सामिसे**ति आमिससङ्खातेन पुरिमद्वयेन सहिते। **सामपाकता**ति सामं अत्तना पाको एतस्साति सामपाकं, सत्ताहकालिकेन

सह पक्कं सामिसं यावजीविकं, तस्स भावो सामपाकता। सयं पक्कं तं अत्तना संसट्ठताय तम्पि आमिसं सामपाकगतिकं करोतीति तस्स सामपाकता होतीति अधिप्पायो।

१४३. **अधिट्ठिता**ति पतिट्ठिता। एव-सद्दो तिट्ठतिसद्दस्स अन्ते दट्ठब्बो।

१४४. **सब्बेसू**ति थम्भादीसु सकलेसु। जहितं वत्थु कुटिभूमि यस्सा **जहितवत्थुका**। परिक्खित्ते जहितवत्थुकाति सम्बन्धो। **सेसा**ति इतरा द्वे कुटियो। **छदनविब्भमा**ति छदनस्स विनासा। एत्थापि ''जहितवत्थुका''ति आनेतब्बन्ति।

भूमिनिद्देसवण्णना निट्ठिता।

१५. उपज्झाचरियवत्तनिद्देसवण्णना

१४५. ''इदं तया दुक्कतं, दुब्भासित''न्तिआदीनि वत्वा चोदनतो, अत्तनो वज्जं अस्सरन्तस्स सतुप्पादवसेन सारणतो, सम्मा पटिपत्तियं सारणतो पवत्तापनतो वा वज्जावज्जं उपनिज्झायति भुसं चिन्तेतीति उपज्झा। उपज्झा एव उपज्झायो। ''एवं तया बुद्धवचनं सज्झायितब्बं, एवं अतिक्कमितब्बं, एवं पटिक्कमितब्ब''न्तिआदिना आचारसिक्खापने आचरति पवत्ततीति आचरियो। सो च निस्सयपब्बज्जाउपसम्पदाधम्माचरियवसेन चतुब्बिधो। उपज्झा च आचरियो च **उपज्झाचरिया,** ते। **निस्साय वसमानो**ति इमिना निस्सयपब्बज्जाउपसम्पदाधम्मन्तेवासिकेसु यो निस्साय वसति, तं दस्सेति। चतूसु हि तेसु निस्सयन्तेवासिकेन याव आचरियं निस्साय वसति, तावसब्बं आचरियवत्तं कातब्बं, नेतरेहि। इतरेहि, निस्सयमुत्तकेहिपि याव चीवररजनं, ताव च अरतिविनोदनादिकञ्च वत्तं कातब्बं। अनापुच्छित्वा पत्तचीवरदानादिम्हि पन एतेसं अनापत्ति। सद्धिविहारिकस्स पन उपज्झायानं याव चीवररजनं, ताव च अरतिविनोदनादिकञ्च अकरोन्तस्स निस्सयमुत्तकस्सापि अमुत्तकस्सापि आपत्तियेव। एकच्चस्स पत्तदानादितो पट्ठाय अमुत्तनिस्सयस्सेव आपत्ति। तेसु मज्झे द्वे आचरियस्स यावजीवं भारा। इतरे पन याव समीपे वसन्ति, तावदेव, तस्मा आचरियेनापि तेसु सम्मा वत्तितब्बं, उपज्झायेन सद्धिविहारिकेसु वत्तब्बमेव नत्थि। **सुपेसलो**ति पियं सीलमस्साति पेसलो, वुद्धि, य-लोपेन ई-कारस्स अत्तकरणेन, सुट्ठु पेसलो सुपेसलो, सिक्खाकामोति अत्थो। **''दन्तकट्ठ''**न्तिआदि ''ददे''तिमस्स कम्मं। **ददे**ति सम्मा आदरेन यथाधिप्पायं ददेय्याति अत्थो। **काले**ति तदनुरूपे काले।

१४६. पत्ते च...पे०... चीवरे च वत्तं चरेति सम्बन्धो। **चरे**ति करेय्य। तत्थ नीचं कत्वा साधुकं अपरिघंसन्तेन धोवनं, मुहुत्तं उण्हे ओतापनं, ठपनट्ठानं उपपरिक्खित्वा चम्मादिना केनचि अन्तरहिताय निक्खिपनं **पत्ते वत्तं**। गामं पविसन्तानं निवासनकायबन्धनसङ्घाटिदानं, धोवित्वा सोदकपत्तस्स दानं **गामप्पवेसे वत्तं**। यदि आकङ्खन्ति, परिमण्डलं निवासेत्वा च पारुपित्वा च नातिदूरनच्चासन्ने गमनं, पत्तपरियापन्नग्गहणञ्च **गमने वत्तं**। निवत्तन्ते पन पठमतरं आगन्त्वा आसनपञ्ञापनं, पादोदकादिउपनिक्खिपनं, पत्तचीवरप्पटिग्गहणं **आगमे** आगमने **वत्तं**। भणन्तानं अन्तरा कथाअनोपातनं सब्बत्थ वत्तं। आसनपञ्ञापनं, उट्ठितेसु आसनउद्धरणं, पादपीठकथलानं उपनिक्खिपनं, पटिसामनञ्च **आसने पादपीठे पादकथले च वत्तं**। धोतपादट्ठपनकं पादपीठं। अञ्ञं कथलं। उपाहना च चीवरञ्चाति द्वन्दो, तस्मिं। सुक्खअल्लचोळेहि पुञ्छनं **उपाहनाय वत्तं**। सिन्नचीवरस्स मुहुत्तं ओतापनं, चतुरङ्गुलं कण्णं उस्सारेत्वा चीवरसंहरणञ्च **चीवरे वत्तं**।

१४७. परिभोजनीय...पे०... पस्सावट्ठानिसु च विहारसोधने च पुन पञ्ञापने च वत्तं तथाति सम्बन्धो। वच्चञ्च पस्सावो च वच्चपस्सावा। तिट्ठति एत्थाति ठानी, कुटि। वच्चपस्सावानं ठानीति तप्पुरिसो। अथ वा तिट्ठति एत्थाति ठानं,

सोयेव समासो, वच्चपस्सावस्स च पतनट्ठानं, तं अस्स अत्थीति इट्ठगेहादि। परिभोजनीयञ्च पानीयञ्च वच्चपस्सावट्ठानी च **परि...पे०... ट्ठानी**। तासु तेसु वा। पादोदकउण्हसीतनहानोदकप्पटियादापनं **परिभोजनीये वत्तं**। पातब्बपानीयेन पुच्छनं उपट्ठापनञ्च **पानीये वत्तं**। सम्मज्जनपानीयउपट्ठापनं **वच्चपस्सावट्ठानीसु वत्तं**। पठमं पत्तचीवरादीनि हरापेत्वा एकमन्ते निक्खिपनादि, उल्लोकतो पट्ठाय मक्कटसन्तानं ओहारेत्वा सम्मज्जनञ्च **विहारसोधने वत्तं**। ओतापेत्वा सोधेत्वा पप्फोटेत्वा अतिहरित्वा यथाठाने भूमत्थरणादिपञ्ञापनं **पुन पञ्ञापने वत्तं। तथा**ति इमिना ''चरे''ति इदं अतिदिसति।

१४८. विहारं सोधेन्तो भिक्खु पटिवाते वा सङ्गणे वा पानीयसामन्ता वा सयनासनं न पप्फोटेय्याति सम्बन्धो। **पानीय**-सद्देन परिभोजनीयञ्च सङ्गहितं। **पटिवाते**ति उपरिवाते। **सङ्गणे**ति बहूनं समोसरणे विवटप्पदेसे। **सयनासनं** नाम भूमत्थरणमञ्चादि।

१४९. न्हाने वत्तं चरे, न्हातस्स कातब्बे चरेति सम्बन्धस्स पुरिसाधीनताय सम्बन्धो वेदितब्बो। चीवरप्पटिग्गहणगत्तपरिकम्मकरणं **नहाने वत्तं। कातब्बे चरे**ति गत्ततो उदकसम्मज्जननिवासनदानादिकिच्चे पवत्तेय्याति अत्थो। ''वनप्पगुम्बे''तिआदीसु विय सिस्स ए-कारादेसं रूपं, तस्मा कातब्बं वत्तं चरेय्याति योजेत्वा वेदितब्बं। बुधा पन ''न्हाने न्हातस्स कातब्बे वत्तं चरे''ति योजेत्वा अत्थं वदन्ति। एवं सति कातब्ब-सद्दस्स कम्मसाधनत्ता वत्तमेव कातब्बं नामाति ''वत्ते वत्तं चरे''ति वुत्तं विय होतीति विरुज्झति। **''नहातेन नहातस्सा''**ति वा पाठो, उदके गत्तपरिकम्मेन थेरं पठमं नहापेत्वा सयम्पि नहातेनाति अत्थो। **पाळिय**म्पि ''नहातेन पठमतरं उत्तरित्वा''ति (महाव० ६७) अत्थि। अथ रङ्गपाके धोवने सिब्बने च वत्तं चरेति सम्बन्धो, रजनपाके चीवरधोवने चीवरसिब्बने चाति अत्थो। रजन्तो चीवरे थेवे ठिते न वजेति सम्बन्धो। **रजन्तो**ति चीवरं रजन्तो। **थेवे**ति रजनबिन्दुम्हि।

१५०. एकच्चस्साति आचरियुपज्झायानं वेरिनो पुग्गलस्स पत्तं वा चीवरानि वा किञ्चनं परिक्खारं वा न ददेय्य न गण्हेय्य वाति सम्बन्धो। तत्थ **न ददेय्य न गण्हेय्या**ति पटिसामनत्थायपि न ददेय्य, न गण्हेय्य वाति अत्थो। ''आकिञ्चन''न्तिआदीसु विय **किञ्चन**-सद्दो दट्ठब्बो, तस्स किञ्चीति अत्थो। **किञ्चिन**न्ति वा पाठो, किञ्चि नं परिक्खारन्ति योजना। पदसिद्धिवसेनेत्थ नन्ति त-सद्दप्पयोगो कतो।

१५१-२. पच्छतो कातुन्ति पच्छासमणं कातुं। **तस्सा**ति एकच्चस्स। **पच्छतो**ति पच्छासमणो हुत्वा। **निन्नेतु**न्ति एकच्चस्स नीहरितुं। सब्बत्थ अनापुच्छा न वट्टतीति योजेतब्बं। **किच्चयं वा**ति वेय्यावच्चादि यं किञ्चि किच्चं वा। किच्चमेव किच्चयं, कस्स यो ''सेनियो''तिआदीसु विय। **परिकम्मं वा**ति पिट्ठिपरिकम्मादिपरिकम्मं। **अत्तनो कारापेतुं वा**ति एकच्चेन अत्तनो कारापेतुं वा। **कातुं वा**ति तस्स अत्तना कातुं वा।

१५३. सीमतो निग्गता बहिभूता **निस्सीमा,** तं। आचरियुपज्झायेसु अवत्वा दूरं भिक्खाचारं गतेसुपि अपस्सन्तेन गामो पविसितब्बो। दिट्ठट्ठानतो पट्ठाय पन आपुच्छितुंयेव वट्टति। **अत्तनो किच्चयं वापी**ति अत्तनो सीमायपि पत्तपचनचीवररजनादिकं सकं करणीयं वापि कातुं।

१५४. अरतिन्ति सासने अनभिरतिं। **सङ्घायत्तेसु कम्मेसू**ति परिवासादितज्जनीयादीसु सङ्घप्पटिबद्धेसु कम्मेसु। **उस्सुक्कं वापी**ति आचरियुपज्झायेसु गरुधम्मं अज्झापन्नेसु, कम्मारहेसु च ''किन्ति नु खो सङ्घो परिवासं ददेय्या''तिआदिना उस्साहं वापि।

१५५. **गिलानेसु उपट्ठेय्या**ति ''पञ्चहि, भिक्खवे, अङ्गेहि समन्नागतो गिलानुपट्ठाको अलं गिलानं उपट्ठातुं, पटिबलो होति भेसज्जं संविधातुं, सप्पायासप्पायं जानाति, असप्पायं अपनामेति, सप्पायं उपनामेति, मेत्तचित्तो गिलानं उपट्ठाति नो आमिसन्तरो, अजेगुच्छी होति उच्चारं वा पस्सावं वा खेळं वा वन्तं वा नीहातुं, पटिबलो होति गिलानं कालेन कालं धम्मिया कथाय सन्दस्सेतुं समादपेतुं समुत्तेजेतुं सम्पहंसेतु''न्ति (महाव० ३६६) एवं वुत्तपञ्चङ्गसमन्नागतेन हुत्वा गिलानेसु उपट्ठहेय्याति अत्थो। इमिना सब्बेहिपि आचरितब्बं गिलानवत्तं उपदिसति। **वुट्ठान**न्ति गेलञ्ञा वुट्ठितं। **आगमे**ति आगमेय्य, ओलोकेय्याति अत्थो। उपज्झाचरियेहि च सद्धिविहारिकअन्तेवासिकेसु यदि ते गिलाना होन्ति, आदितो पट्ठाय चीवरे रजनपरियोसानञ्च अरतिविनोदनादिकञ्च वत्तं, अगिलानेसु पन उद्देसपरिपुच्छा ओवादानुसासनिया अनुग्गहोपत्तचीवरादिदानञ्चाति सब्बं कातब्बं। तेनेव हेट्ठा वुत्तं ''तस्मा आचरियेनापि तेसु सम्मा वत्तितब्बं, उपज्झायेन सद्धिविहारिकेसु वत्तब्बमेव नत्थी''ति।

उपज्झाचरियवत्तनिद्देसवण्णना निट्ठिता।

१६. वच्चपस्सावट्ठानिकनिद्देसवण्णना

१५६. **वच्चपस्सावट्ठानिक**न्ति ठानम्हि ठाने वा भवं वच्चपस्सावट्ठानिकं। यथावुड्ढं वच्चं न करेय्याति सम्बन्धो। ये ये वुड्ढा **यथावुड्ढं,** आगतप्पटिपाटिं हित्वा वुड्ढप्पटिपाटियाति अत्थो। **वच्च**न्ति उपलक्खणमत्तं, पस्सावञ्च नहानञ्च न करेय्याति अधिप्पायो। तदेव समत्थेति **''यातानुपुब्बिया''**तिआदिना। **यातानुपुब्बिया**ति यातानं गतानं अनुपुब्बि अनुक्कमो यातानुपुब्बि, ताय। **वच्च...पे०... तित्थञ्चा**ति एतं तयं लब्भतीति अत्थो, भिक्खुनाति विञ्ञायति।

१५७. उब्भजित्वा च सहसा च नो पविसेय्याति सम्बन्धो। **उब्भजित्वा**ति चीवरं दूरतोव उक्खिपित्वा। **सहसा**ति सीघं। उक्कासित्वा पविसेय्याति योजना।

१५८. वच्चपस्सावदोणीनं बहीति सम्बन्धो। **उभय**न्ति वच्चम्पि पस्सावम्पि।

१५९. **कूपे**ति वच्चावाटे। **कट्ठ**न्ति अवलेखनकट्ठं। **फरुसेना**ति खरेन अवलेखनकट्ठेन। **उहतञ्चापी**ति अत्तना वा परेन वा उहतञ्चापि वच्चमक्खितञ्चापीति अत्थो। **धोवये**ति सति उदके, उदके असति कट्ठेनपि सोधेय्य।

१६०. **न निक्खमे**ति न निक्खमेय्य। **चपु चपू**ति अनुकरणं, विच्छायं द्वित्ते चपु चपु कत्वाति किरियाविसेसनं। **नाचमेय्या**ति न धोवेय्य। सति पन उदके आचमितब्बं, असति येन केनचि पुञ्छित्वा गन्तब्बं, सब्बसाधारणट्ठाने च आचमनकुम्भिया उदकं न सेसेतब्बं। **उक्लाप**न्ति कचवरं। **विसोधये**ति विहारसोधने विय वच्चपस्सावकुटियो, परिवेणकोट्ठके च सम्मज्जेय्य। सब्बत्थेव च पन वत्तभेदे दुक्कटं।

वच्चपस्सावट्ठानिकनिद्देसवण्णना निट्ठिता।

१७. आपुच्छकरणनिद्देसवण्णना

१६१. **आपुच्छकरण**न्ति आपुच्छाय करणं। **अनज्झिट्ठोवा**ति अनाणत्तोव, अयाचितो एव वा। **न च विस्सजे**ति पुच्छितपञ्हं न विस्सज्जेय्य च, आपुच्छित्वा वा याचितो वा यथावुत्तमेतं कातुं लभतीति अधिप्पायो।

१६२. **आपुच्छित्वा कथेन्तस्सा**ति अत्तनो वुड्ढं आपुच्छित्वा धम्मादिकं भासन्तस्स। **पुन वुड्ढतरागमे**ति पुन अञ्ञस्स वुड्ढतरस्स आगमने सतीति अत्थो। **पुनआपुच्छनं नत्थी**ति भासितब्बं ठपेत्वा पुन आपुच्छनकिच्चं नत्थीति अत्थो। सङ्घत्थेरे असति आरद्धम्पि अट्ठपेत्वा कथेन्तस्सापि एसेव नयो। भत्तग्गे अनुमोदतो च आपुच्छनं नत्थीति सम्बन्धो। **अनुमोदतो**ति दायकेहि याचितस्स तंतंपुञ्ञानुमोदनवसेन धम्मकथं करोतो च। अनुमोदनञ्च थेराधेय्यं। ''अनुजानामि, भिक्खवे थेरेन भिक्खुना भत्तग्गे अनुमोदितु''न्ति (चूळव० ३६२) हि वुत्तं। ''सचे मनुस्सा अत्तनो अभिरुचिकेन एकेन अनुमोदनं कारेन्ति, नेव तस्स अनुमोदतो आपत्ति, न महाथेरस्स भारो होति। उपनिसिन्नकथायमेव हि मनुस्सेसु कथापेन्तेसु महाथेरो आपुच्छितब्बो''ति **अट्ठकथायं** (चुळव० अट्ठ० ३६२) वुत्तं।

१६३. वुड्ढेन एकविहारके वसन्तो चाति सम्बन्धो। **वुड्ढेना**ति वुड्ढेन सद्धिं। **एकविहारके**ति सवनूपचारे खुद्दकविहारे, न महाविहारे। कुच्छितत्थे हि कप्पच्चयो। **न सज्झायेय्या**ति सज्झायनं न करेय्य।

१६४. **''धम्मं न भासये''**तिआदीसु अनापुच्छाति सम्बन्धितब्बं। **न च विज्झपे**ति न च निब्बायेय्य। वातपानञ्च आलोकसन्धिफलकं कवाटञ्च द्वारफलकं **वातपानकवाटं** वा न विवरेय्य न थकेय्य चाति **न**-कारो सब्बत्थ योजेतब्बो।

१६५. एकचङ्कमे वुड्ढेन चङ्कमन्तोपि येन वुड्ढो, तेन परिवत्तयेति योजना। **येन तेना**ति भुम्मत्थे करणवचनं, यत्थ वुड्ढो, तत्थाति अत्थो, वुड्ढं ओहाय अञ्ञतो न गन्तब्बन्ति अधिप्पायो। **सो**ति नवको। **एन**न्ति वुड्ढं। सब्बत्थ दुक्कटं। अयञ्हि खन्धकधम्मता यत्थ न-कारेन पटिसेधो, तत्थ दुक्कटन्ति।

आपुच्छकरणनिद्देसवण्णना निट्ठिता।

१८. नग्गनिद्देसवण्णना

१६६. **''वजे''**तिआदीसु न-सद्दो सम्बन्धितब्बो। तत्थ पन यथानुरूपभोजनादिकं कम्मवचनं अज्झाहरित्वा ''भोजनं न भुञ्जे''तिआदिना अत्थो वेदितब्बो।

१६७. **न करे**ति हत्थकम्मादिकं परिकम्मं सयम्पि न करेय्याति अत्थो। **पटिच्छादीसू**ति निद्धारणे भुम्मं, जन्ताघरुदकवत्थप्पटिच्छादीनं मज्झेति अत्थो। परिकम्मे दुवे कप्पियाति सम्बन्धो। **परिकम्मे**ति जन्ताघरे उदकेपि उपज्झायादीनं कत्तब्बपरिकम्मविसये, न अभिवादनादीसु। **दुवे**ति जन्ताघरउदकप्पटिच्छादयो। छादेन्ति एतायाति छादि, वत्थस्स छादि **वत्थच्छादि। सब्बत्था**ति सब्बकम्मेसूति।

नग्गनिद्देसवण्णना निट्ठिता।

१९. न्हानकप्पनिद्देसवण्णना

१६८. कप्पनं कप्पियता कप्पो, न्हाने कप्पो **न्हानकप्पो**। नवको थेरानं पुरतो उपरि वा न च न्हायेय्याति सम्बन्धो। **न चा**ति नयेव। **पुरतो**ति अभिमुखे। **उपरी**ति नदिया उपरि।

१६९-१७१. कुट्टत्थम्भतरुट्टाने कायं न घंसयेति सम्बन्धो। तत्थ **कुट्टं** नाम इट्ठकदारुसिलाभित्ति। **थम्भो** नाम

नहानतित्थे निखनित्वा ठपितो। **तरू**ति रुक्खो। **अट्टानं** नाम तच्छेत्वा अट्ठपदाकारेन राजियो छिन्दित्वा नहानतित्थे निखातफलकं। गन्धब्बहत्थेन वा...पे०... मल्लकेन वा कायं सरीरेन वा अञ्ञमञ्ञं न घंसयेति सम्बन्धो। **गन्धब्बहत्थेना**ति दारुमयहत्थेन। **कुरुविन्दकसुत्तिया**ति कुरुविन्दकपासाणचुण्णानि लाखाय बन्धित्वा कतगुळिकावलिया सुत्तेन आवुणितसुत्तिया। **मल्लकेना**ति मकरदन्तके छिन्दित्वा पदुमकण्णिकसण्ठानेन कतमल्लकेन। **सरीरेना**ति अत्तनो कायेन। अञ्ञमञ्ञस्स अञ्ञमञ्ञं किरियाकरणसङ्खाते किरियाब्यभिहारे द्वित्तं। कपाल...पे०... पुथुपाणि च सब्बेसं वट्टतीति सम्बन्धो। कपालञ्च इट्ठका च, तासं खण्डानि। **पुथुपाणी**ति पुथु नाना पाणि पुथुपाणि, हत्थपरिकम्मं रुळ्हीवसेन। **सब्बेस**न्ति गिलानागिलानानं। गिलानस्स अकतमल्लकं वट्टतीति सम्बन्धो। **अकतमल्लकं** नाम कतमल्लकविपरीतं। **फेणं** नाम समुद्दफेणन्ति।

न्हानकप्पनिद्देसवण्णना निट्ठिता।

२०. अवन्दियनिद्देसवण्णना

२७८. छन्नं मातादीनञ्च दामरिकचोरस्स इस्सरियस्स अनामट्ठो पिण्डपातो दातुं अवारितोति योजेतब्बं। **छन्न**न्ति मातादीनं छन्नं मज्झे। **मातादीन**न्ति भिक्खुनिस्सितं ठपेत्वा अवसेसानं पञ्चन्नं मातादीनं। ''छन्न''न्ति पन योजनाय अट्ठकथाय विरुज्झति। तत्थ हि ''मातापितून''न्तिआदिना भिक्खुनिस्सितं ओहाय सत्तेव वुत्ता। **आचरियबुद्धदत्तत्थेरेन** च तथेव वुत्तं –

''अनामट्ठोपि दातब्बो, पिण्डपातो विजानता।
छिन्नं मातापितूनम्पि, तदुपट्ठायकस्स च॥

''इस्सरस्सापि दातब्बो, चोरदामरिकस्स च।
भण्डुकस्सत्तनो चेव, वेय्यावच्चकरस्सपी''ति॥ (विनय वि॰ ४९३-४९५)।

दामरिकचोरस्साति रज्जं पत्थयमानस्स पाकटचोरस्स। **अनामट्ठो**ति अपब्बजितस्स हत्थतो लद्धा अत्तना अञ्ञेन वा पब्बजितेन अग्गहितअग्गो, अयं अनामट्ठपिण्डपातो। पटिसन्थारो ''विहारप्पत्तं आगन्तुकं वा दलिद्दादिं वा दिस्वा 'पानीयं पिवा'ति दातब्बं, पादमक्खनतेलं दातब्बं, काले आगतस्स यागुभत्तं, विकाले आगतस्स सचे तण्डुला अत्थि, तण्डुला दातब्बा, सयनट्ठानं दातब्बं, चोरानं पन सङ्घिकम्पिदातब्ब''न्ति वुत्तो। अवसेसपटिसन्थारो पन अपच्चासीसन्तेन कातब्बो। तथा धम्मपटिसन्थारोपि यस्स कस्सचि दातब्बोव।

२७९. **तेस**न्ति अञ्ञातकादीनं गिहीनं। **कयिरा**ति ''भणथा''ति वुत्ते करेय्य। ''न करोमा''ति वुत्ते सचे विप्पटिसारिनो भविस्सन्ति, कातब्बं। **नत्तनो**ति अत्तनो सुत्तोदकेहि न कयिराति योजनीयं। एवं सामञ्ञेन परित्ते पटिपज्जनविधिं दस्सेत्वा इदानि आटानाटियपरित्ते पटिपज्जितब्बविधिं दस्सेतुं **''भणितब्ब''**न्तिआदिमाह। **भणापेन्ते**ति ''भणथा''ति अज्झेसनपुब्बकं पयोजेन्ते। **परित्तं सासनोगध**न्ति पठममेव आटानाटियसुत्तं अभणित्वा सासनपरियापन्नं मेत्तसुत्तं धजग्गसुत्तं रतनसुत्तन्ति इमानि सुत्तानि सत्ताहं भणित्वा यथापरिकम्मं परित्तं आटानाटियपरित्तं भणितब्बन्ति योजना।

२८०. ''आगन्त्वा सीलं देतु, धम्मं परित्तञ्च भासतू''ति केनचि पेसितो गन्त्वा सीलं वा दातुं धम्मं परित्तं वा वत्तुं लब्भतीति सम्बन्धो।

भेसज्जनिद्देसवण्णना निट्ठिता।

३७. उग्गहनिद्देसवण्णना

२८१. पुग्गल-सद्दमत्ते पयुत्ते अत्तनोपि गहणसम्भवो सियाति ब्यभिचारत्थं **अञ्ञ**-सद्दप्पयोगो। सति सम्भवे ब्यभिचारे विसेसनं सात्थकं होतीति। **दसभेदम्पि रतनन्ति** ''मुत्ता मणि वेळुरियो सङ्खो सिला पवाळं रजतं जातरूपं लोहितङ्को मसारगल्ल''न्ति (पाचि० ५०६) एवं वुत्तं दसभेदम्पि रतनं। **उग्गण्हन्तस्सा**ति गण्हन्तस्स सम्पटिच्छन्तस्स।

२८२-३. तेसु अत्तत्थं उग्गण्हन्तस्स द्वीसु निस्सग्गीति सम्बन्धो। **तेसू**ति तेसु दससु मज्झे। **द्वीसू**ति रजतजातरूपसङ्खातेसु द्वीसु निस्सग्गियवत्थूसु। **अत्तत्थ**न्ति इमिना नवकम्मादीनं पञ्चन्नं अत्थाय दुक्कटन्ति दीपेति। **सेसेसु दुक्कट**न्ति अवसेसेसु अट्ठसु सब्बेसम्पि अत्थाय उग्गण्हन्तस्स दुक्कटन्ति अत्थो। गणञ्च सङ्घञ्च पुग्गलञ्च अनामसित्वा ''चेत्यस्स नवकम्मस्स दम्मी''ति वुत्ते च न पटिक्खिपेति सम्बन्धनीयं। **न पटिक्खिपे**ति इमिना सङ्घादिं आमसित्वा वुत्ते पटिक्खिपनं दीपेति। पटिक्खित्ते ''कप्पियकारकानं वा हत्थे भविस्सति, मम पुरिसानं मय्हमेव वा हत्थे भविस्सति, केवलं तुम्हे पच्चये परिभुञ्जथा''ति वदति, वट्टति। चतुपच्चयत्थाय च दिन्नं येन येन अत्थो होति, तदत्थं उपनेतब्बं। तेसं चीवरत्थाय दिन्नं चीवरेयेव उपनेतब्बं। सचे चीवरेन तादिसो अत्थो नत्थि, पिण्डपातादीहि सङ्घो किलमति, सङ्घसुट्ठुताय अपलोकेत्वा तदत्थायपि उपनेतब्बं। एस नयो पिण्डपातगिलानपच्चयत्थाय दिन्नेपि। सेनासनत्थाय दिन्नं पन गरुभण्डत्ता तत्थेव उपनेतब्बं, सेनासनेसु नस्सन्तेसु जग्गनत्थं मूलच्छेज्जं अकत्वा अविस्सज्जेत्वा यापनमत्तं परिभुञ्जितब्बं।

२८४. खेत्तादीनं केसञ्चि दुक्कटवत्थूनं सम्पटिच्छनूपायं दस्सेतुं **''खेत्त''**न्तिआदि वुत्तं। तत्थ **खेत्त**न्ति पुब्बण्णविरुहनट्ठानं। **वत्थु**न्ति अपरण्णउच्छुफलादीनं विरुहनट्ठानं। **दासपस्वादिक**न्ति दासपसुपुप्फारामफलारामादिकं। पटिक्खिपित्वा कप्पियेन कमेन च गण्हेय्याति सम्बन्धो। **कप्पियेन कमेन चा**ति एत्थ **कम**-सद्दो वोहारप्पटिपाटिवचनो, तस्मा परेसं अत्तनो च कप्पियवोहारक्कमेनेवाति अत्थो।

सो च **खेत्तवत्थू**सु ताव ''चत्तारो पच्चये परिभुञ्जथा''ति वा ''कप्पियकारकानं हत्थे भविस्सती''ति वा ''सङ्घो कप्पियभण्डं भुञ्जतू''ति वा ''सीमं देमा''ति वा परेहि वुत्तो, ''साधु, उपासक मिगपक्खिनो एत्थ निब्भया सुखेन जीविस्सन्ती''ति अत्तना वा तळाके यथावुत्तेनेव ''उदकं परिभुञ्जिस्सन्ति, भण्डकं धोविस्सन्ति, मिगपक्खिनो पिविस्सन्ती''ति परेहि वा ''साधु, उपासक, सङ्घो पानीयं पिविस्सती''तिआदिना अत्तना वा **दासे** ''आरामिकं दम्मि, वेय्यावच्चकरं दम्मि, कप्पियकारकं दम्मी''ति वा **पसूसु** ''पञ्चगोरसपरिभोगत्थाय दम्मी''ति **आरामे** ''वनं दम्मी''ति एवमादिना वुत्तो वेदितब्बो। सचे पन कोचि अब्यत्तो अकप्पियवोहारेन खेत्तादिं पटिग्गण्हाति वा कारेति वा, तं भिक्खूहि न परिभुञ्जितब्बं, तं निस्साय लद्धं कप्पियभण्डम्पि अकप्पियमेव। अब्यत्तेन पन लज्जीभिक्खुना कारापितेसु किञ्चापि पटिग्गहणं कप्पियं, भिक्खुस्स पयोगपच्चया उप्पन्नेन मिस्सत्ता विसगतपिण्डपातो विय, अकप्पियमंसभोजनं विय च दुब्बिनिब्भोगं होति, सब्बेसं अकप्पियमेव।

२८५-६. नव...पे०... किरिया च अनवे मत्तिकुद्धारणञ्च बन्धो च आळिया थिरकारो च अनवे केदारे अतिरेकभागग्गहणञ्च नवे च अपरिच्छिन्नभागे सस्से ''एत्तके देथा''ति कहापणुट्ठापनञ्चाति सब्बेसम्पि अकप्पियन्ति सम्बन्धो। मातिका च केदारो च तळाको चाति द्वन्दो मातिक...पे०... तळाका। तेसं किरियाति समासो। **अनवे**ति

चतुपच्चयवसेन पटिग्गहिते पुराणतळाके। उदकवसेन पटिग्गहिते पन सुद्धचित्तानं वट्टति। **बन्धो**ति पाळिया बन्धो। पोराणकेदारे नियमितपकतिभागत्ता आह **''अनवे''**ति। **अपरिच्छिन्नभागे**ति ''एत्तके भूमिभागे एत्तको भागो दातब्बो''ति एवं अपरिच्छिन्नभागे।

२८७-९. ''कस वप्प'' इच्चादिं अवत्वा च ''एत्तकाय भूमिया एत्तको भागो देय्यो''ति भूमिं वा पतिट्ठापेति, तस्सेवेतमकप्पियन्ति सम्बन्धो। **च**-सद्दो अवधारणे। **पतिट्ठापेती**ति यो भिक्खु पतिट्ठापेति। **तस्सेवा**ति तस्स पतिट्ठापकभिक्खुस्सेव। **एत**न्ति पतिट्ठापितभूमितो लद्धधञ्ञं ''एत्तके भूमिभागे सस्सं कतं, एत्तकं गण्हथा''ति एवं वदन्ते पमाणगण्हनत्थं दण्डरज्जुभि मिनने वा खले ठत्वा रक्खणे वा तं नीहरापने वा कोट्ठागारादिपटिसामने वा एतं तस्सेव अकप्पियन्ति सम्बन्धनीयं। **पतिट्ठापेति चा**ति सो भिक्खु पतिट्ठापेति च। **कत**न्ति अम्हेहि कतं। **वदन्तेव**न्ति एवं कस्सके वदन्ते। **पमाण**न्ति भूमिप्पमाणं। **नीहरापने**ति खलतो गेहस्स नीहरापने। **एत**न्ति मितलद्धरक्खितादिकं। **तस्सेवा**ति मानकरक्खकादिनो एव। अपुब्बस्स अनुप्पादितत्ता अञ्ञेसं कप्पतीति आह **''तस्सेवेतमकप्पिय''**न्ति।

२९०. पटिसामनप्पसङ्गेनाह **''पटिसामेय्या''**तिआदि। पितुसन्तकम्पि गिहिसन्तकं यं किञ्चीति सम्बन्धो। **पितुसन्तक**न्ति पिता च माता च पितरो, तेसं सन्तकं। **गिहिसन्तक**न्ति इमिना पञ्चन्नं सहधम्मिकानं सन्तकं यं किञ्चि परिक्खारं पटिसामेतुं वट्टतीति दीपेति। **यं किञ्ची**ति कप्पियं अकप्पियं वा अन्तमसो मातुकण्णपिळन्धनतालपण्णम्पि। **भण्डागारिकसीसेना**ति सीसङ्गमिव पधानं यं किञ्चि ''सीस''न्ति इध उपचारवसेन वुच्चति, तथा भण्डागारिकसद्दोपि भावप्पधानो, भण्डागारिको भण्डागारिकत्तं सीसं पधानन्ति विसेसनपरपदे कम्मधारयो, तेन, भण्डागारिकत्तस्स पधानकरणेनाति अत्थो।

२९१-२. अवस्सं पटिसामियन्ति अवस्सं सङ्गोपेतब्बं। **वुत्तेपी**ति मातापितूहि वुत्तेपि।

२९३-४. वड्ढकिआदयो वा राजवल्लभा वा ''सकं परिक्खारं वा सयनभण्डं वा पटिसामेत्वा देही''ति यदि वदन्ति, छन्दतोपि भयापि न करेय्याति योजना। **परिक्खार**न्ति वासिफरसुआदिउपकरणभण्डं। **छन्दतोपि भयापी**ति वड्ढकिआदीसु छन्देन, राजवल्लभेसु भयेन।

२९५-६. पटिसामितुं वट्टतीति योजेतब्बं। **सङ्कन्ती**ति यादिसे पदेसे ''भिक्खूहि वा सामणेरेहि वा गहितं भविस्सती''ति सङ्कं उप्पादेन्ति, तादिसे विहारावसथस्सन्तोति योजनीयं। **विहारावसथस्सा**ति विहारस्स च आवसथस्स च। **रतन**न्ति दसविधं रतनं। **रतनसम्मत**न्ति वत्थादिकं। **निक्खिपेय्या**ति सामिके दिट्ठे नियमेत्वा दातुं ''एत्तका कहापणा''तिआदिनानुरूपेन मत्तिकलञ्छनादिनिमित्तेन वा सञ्ञाणं कत्वा निक्खिपेय्य। **गहेत्वाना**ति तादिसे असति अत्तनाव गहेत्वा। **तादिसे**ति रतने वा रतनसम्मते वा सति। **सामिकानागमं ञत्वा**ति यदि अत्तनि आसङ्कन्ति, मग्गा ओक्कम्म निसीदिय पच्छा सामिकानं अनागमनं विञ्ञाय। **पतिरूप**न्ति रतनसम्मते पंसुकूलग्गहणं रतने निरुस्सुक्कगमनन्ति एवरूपं भिक्खूनं अनुरूपन्ति।

उग्गहनिद्देसवण्णना निट्ठिता।

३८. दूसननिद्देसवण्णना

२९७. ददतोति ससन्तकं परसन्तकञ्च देन्तस्स। **कुलदूसनदुक्कट**न्ति अत्तनो दुप्पटिपत्तिया कुलानं दूसनं

पसादविनासनं कुलदूसनं, तेन दुक्कटं कुलदूसनदुक्कटं।

२९८. एत्थ सङ्घिकं गरुभण्डं इस्सरेन देन्तस्स थुल्लच्चयन्ति सम्बन्धो। **एत्था**ति एतेसं पुप्फादीनं मज्झे। **इस्सरेना**ति तद्धितलोपेन वुत्तं, इस्सरियेन इस्सरवतायाति अत्थो। **देन्तस्सा**ति कुलसङ्गहत्थाय इस्सरवताय ददतो। **थुल्लच्चय**न्ति कुलसङ्गहत्थाय ददतो ''कुलदूसनदुक्कट''न्ति सामञ्ञविहितदुक्कटेन सद्धिं ''पञ्चिमानि, भिक्खवे, अविस्सज्जियानि, न विस्सज्जेतब्बानि सङ्घेन वा गणेन वा पुग्गलेन वा, विस्सज्जितानिपि अविस्सज्जितानि होन्ति। यो विस्सज्जेय्य, आपत्ति थुल्लच्चयस्सा''ति (चूळव० ३२१) एवं वुत्तथुल्लच्चयन्ति अत्थो। अञ्ञत्थ थुल्लच्चयमेव। सेनासनत्थाय नियमितेपि एसेव नयो। सङ्घस्स सन्तकं थेय्या देन्तस्स दुक्कटादीनीति सम्बन्धितब्बं। **देन्तस्सा**ति वुत्तनयमेव। **दुक्कटादीनी**ति कुलसङ्गहत्थाय ददतो कुलदूसनदुक्कटेन सद्धिं मासके वा ऊनमासके वा दुक्कटं, अतिरेकमासके वा ऊनपञ्चमासके वा थुल्लच्चयं, पञ्चमासके वा अतिरेकपञ्चमासके वा पाराजिकन्ति एवं दुक्कटादीनि होन्तीति अत्थो। अञ्ञत्थ दुक्कटादीनेव।

२९९-३००. कुलसङ्गहत्थं फलपुप्फूपगं रुक्खं सब्बथा रोपेतुञ्च रोपापेतुञ्च जग्गितुञ्च न वट्टतीति सम्बन्धनीयं। **च**-सद्दो ओचिनितुं ओचिनापेतुं, गन्थितुं गन्थापेतुन्ति च अवुत्तानि च समुच्चिनोति। फलपुप्फानि सम्पादनवसेन उपगच्छतीति **फलपुप्फूपगं। सब्बथा**ति कप्पियवोहारअकप्पियवोहारपरियायओभासनिमित्तकम्मवसेन सब्बप्पकारेनेव। तत्थ **कप्पियवोहारो** नाम ''इमं रुक्खं जान, इमं आवाटं जान, इमं मालावच्छं जान, एत्थ उदकं जाना''ति वचनं, सुक्खमातिकाय उजुकरणञ्च। तब्बिपरियायेन **अकप्पियवोहारो** नाम। **परियायो** नाम ''पण्डितेन मालावच्छादयो रोपापेतब्बा, न चिरस्सेव उपकाराय संवत्तन्ती''तिआदिवचनं। **ओभासो** नाम कुद्दालखणित्तादीनि च मालावच्छे च गहेत्वा ठानं। **निमित्तकम्मं** नाम कुद्दालउदकभाजनादीनं आहरित्वा समीपे ठपनं। **जग्गितु**न्ति वदन्ति उदकसेचनादीनि कत्वा। गन्थनगन्थापनेसु पन सब्बापि छ पुप्फविकतियो वेदितब्बा गन्थिमं गोप्फिमं वेधिमं वेठिमं पूरिमं वायिमन्ति। नामवसेनेव पनेतेसं विसेसो वेदितब्बो। तं पन कुलसङ्गहतो अञ्ञत्रापि भिक्खुस्स कातुम्पि अकप्पियवचनेन कारापेतुम्पि न वट्टति। ''एवं जान, एवं कते सोभेय्य, यथा एतानि पुप्फानि न विकिरियन्ति, तथा करोही''तिआदिना पन कप्पियवचनेन कारापेतुं विना कुलसङ्गहं वट्टति। **रोपनादीनी**ति अकप्पियपथवियं रोपापनसिञ्चापनादीनि, अञ्ञत्थ रोपनादीनि।

३०१-२. इदानि पुप्फदानादीसु अट्ठसु कुलसङ्गहवत्थूसु अवसेसानि द्वे दस्सेतुं **''वुत्तावा''**तिआदिमाह। **वुत्ताव मिच्छाजीवविवज्जना**यं वुत्ता एव। जङ्घपेसने विनिच्छयो वुच्चतीति पाठसेसो। पितरो भण्डुं सकं वेय्यावच्चकरं ठपेत्वा गिहिकम्मेसु दूतसासनं हरणे पदवारेन दुक्कटन्ति सम्बन्धो। सहधम्मिकेसु वत्तब्बमेव नत्थीति पितादयोव वुत्ता। **गिहिकम्मसू**ति विसयसत्तमी। **पदवारेना**ति पदक्कमेन, पदे पदेति अधिप्पायो। पठमं सासनं अग्गहेत्वापि पुन वदतो दुक्कटन्ति योजेतब्बं। **पुना**ति पच्छा। ''अयं दानि सो गामो, हन्द नं सासनं आरोचेमी''ति मग्गा ओक्कमन्तस्स च पदे पदे वदतो च दुक्कटन्ति अधिप्पायो। तस्स पन सासनं पटिक्खिपित्वा सयमेव कारुञ्ञे ठितेन गन्त्वा अत्तनो पतिरूपं सासनं आरोचेतुं, ''मम वचनेन भगवतो पादे वन्दथा''तिआदिकं गिहीनं कप्पियसासनं हरितुञ्च वट्टति।

३०३. **अभूतारोचनरूपियसंवोहारुग्गहादिसा**ति अभूतारोचनाय रूपियसंवोहारे च उग्गहे उप्पन्नपच्चये आदिसन्ति कथेन्ति पकासेन्तीति अभूता...पे०... हादिसा, तंसदिसाति वुत्तं होति।

३०४. पितूनं हरापेत्वा हरित्वापि पुप्फानि वत्थुपूजत्थं दातुं, सेसञातीनं पत्तानं वत्थुपूजत्थं दातुन्ति योजनीयं। ''हरापेत्वा हरित्वा''ति वुत्ते ''पक्कोसित्वा पक्कोसापेत्वा वा''ति वुत्तमेव सियाति न वुत्तं। **पत्तान**न्ति पक्कोसकेन पत्तापि

गहिता। **वत्थुपूजत्थ**न्ति रतनत्तयपूजनत्थं। उपासकानम्पि पन सम्पत्तानं वत्थुपूजत्थं दातुं वट्टतियेव। **लिङ्गादिपूजत्थ**न्ति सिवलिङ्गगिण्डुबिम्बादिपूजनत्थं।

३०५. **तथा फल**न्ति इमिना पुप्फे वुत्तं सब्बं अपदिसति। **परिब्बयविहीनान**न्ति परिब्बयं पाथेय्यं विहीनं नट्ठं येसं आगन्तुकानन्ति समासो। **सपर**न्ति अत्तनो विस्सासिका। **अट्ठकथायं** (पारा० अट्ठ० २.४३६-४३७) पन ''अत्तनो सन्तकंयेवा''ति वचनं थुल्लच्चयादिविभागतो मोचेत्वा वुत्तं।

३०६. सम्मतेन देय्यन्ति योजना। **देय्य**न्ति चतुत्थभागं दातब्बं। इतरेन तु अपलोकेत्वा दातब्बन्ति सम्बन्धितब्बं। **इतरेन तु** असम्मतेन पन।

३०७. **परिच्छिज्जा**ति ''एत्तकानि फलानि दातब्बानी''ति एवं फलपरिच्छेदेन वा ''इमेहि रुक्खेहि दातब्बानी''ति एवं रुक्खपरिच्छेदेन वा परिच्छिन्दित्वा। **ततो**ति परिच्छिन्नफलतो रुक्खतो वा। याचमानस्स गिलानस्सेतरस्स वाति सम्बन्धनीयं। **रुक्खाव दस्सिया**ति ''इध फलानि सुन्दरानि, इतो गण्हथा''ति अवत्वा ''इतो गहेतुं लब्भती''ति रुक्खा वा दस्सेतब्बा।

३०८. इदानि अट्ठसु पुप्फादीनं चतुन्नं विनिच्छयं दस्सेत्वा यथावुत्तफलपुप्फविनिच्छयं अवसेसेसु चतूसु अपदिसन्तो **''सिरीसा''**तिआदिमाह। **सिरीसचुण्णकसवादिचुण्णे**ति कसावं यं किञ्चि आदि यस्स, तमेव चुण्णं, सिरीसचुण्णञ्च कसावादिचुण्णञ्चाति समासो। ''सिरीसचुण्णं वा अञ्ञं वा कसाव''न्ति हि **अट्ठकथायं** (पारा० अट्ठ० २.४३६-४३७) वुत्तं। ''कसावादी''ति वत्तब्बे रस्सेन वुत्तं। **सेसेसू**ति वेळुआदीसु तीसु। पाळिया अवुत्तस्सापि **अट्ठकथायं** वुत्तत्ता आह **''पण्णम्पेत्थ पवेसये''**ति। **एत्था**ति पुप्फादीसूति।

दूसननिद्देसवण्णना निट्ठिता।

३९. वस्सूपनायिकनिद्देसवण्णना

३०९-३१०. पुरिमिका पच्छिमिका इति वस्सूपनायिका दुवेति सम्बन्धो। आसाळ्हिपुण्णमाय अनन्तरे पाटिपददिवसे उपगन्तब्बा पच्छिमिकाय पुरे भवाति पुरिमा, सा एव **पुरिमिका**। ततो पच्छा भवा अपराय पुण्णमाय अनन्तरे पाटिपददिवसे उपगन्तब्बा **पच्छिमिका**। उपनयनं पापुणनं उपगमनं उपनायिका, **वस्स**न्ति वुट्ठि, इध पन वस्सकालं ''वस्स''न्ति उपचारेन गहेत्वा तत्थ वासो उपचारेनेव ''वस्स''न्ति वुच्चति, वस्सस्स वस्सावासस्स उपनायिका वचीभेदवसेन वा आलयकरणवसेन वा उपगमनं **वस्सूपनायिका**। तत्थ आलयपरिग्गाहो च वचीभेदो चाति पुरिमिका वस्सूपनायिका दुवे, आलयपरिग्गाहो च वचीभेदो चाति पच्छिमिका वस्सूपनायिका दुवेभि सम्बन्धितब्बं। **तत्था**ति तासु द्वीसु। तदुभयं दस्सेतुं **''एदिसो''**तिआदि वुत्तं। सो आलयपरिग्गाहो च वचीभेदो च ''इमस्मिं विहारे इमं तेमासं वस्सं उपेमि, इध वस्सं उपेमी''ति एदिसो, एतादिसोति अत्थो। एत्थ च कमुप्पत्तिअनादरा वचीभेदो पठमं वुत्तो। उभयथा वस्सं उपगन्तुं वट्टति। तेनेव **अट्ठकथायं** (वि० सङ्ग० अट्ठ० १७९; महाव० अट्ठ० २०७) ''सचेपि 'इध वस्सं वसिस्सामी'ति आलयो अत्थि, असतिया पन वस्सं न उपेति, गहितसेनासनं सुग्गहितं, छिन्नवस्सो न होति, पवारेतुं लभतियेव, विनापि हि वचीभेदं आलयकरणमत्तेनपि वस्सं उपगतमेव होती''ति वुत्तं। नावासत्थवजेसु पन परियेसित्वा सेनासनं अलभन्तेन आलयकरणमत्तेनेव उपगन्तब्बं। उपगच्छन्तेन च विहारं पटिजग्गित्वा पानीयं परिभोजनीयं उपट्ठापेत्वा सब्बं

चेतियवन्दनादिसामीचिकम्मं निट्ठापेत्वा उपगन्तब्बं। आलयपरिग्गहे आलयं दस्सेतुं **''चित्तुप्पादेत्थ आलयो''**ति आह। **एत्था**ति द्वीसु।

३११. तदहूति तस्मिं वस्सूपनायिकदिवसे। **जानन्**ति ''अज्ज वस्सूपनायिका''ति जानन्तो, **अनुपगच्छतो**तिमस्स विसेसनं।

३१२. दुतियन्ति पच्छिमिकं। **अनुपगतो**ति केनचि अन्तरायेन पुरिमिकं अनुपगतो। **तेमासन्**ति पुरिमं वा तेमासं पच्छिमं वा तेमासं। वस्सं उपगन्त्वा पन अरुणं अनुट्ठापेत्वापि तदहेव सत्ताहकरणीयेन पक्कमन्तस्सापि अन्तोसत्ताहे निवत्तेन्तस्सापि अनापत्ति।

३१३-५. मातापितूनं पञ्चन्नं सहधम्मिकानञ्च अत्थाय गिलानतदुपट्ठाकभत्तं ओसधञ्च एसिस्सं वा पुच्छिस्सामि वा उपट्ठिस्सं वा गन्त्वा अहं नाभिरतं वूपकासेस्सं वा कुक्कुच्चं विनोदनञ्च दिट्ठिं विवेचनञ्च गरुकादिकं वुट्ठानं वापि उस्सुक्कं वापि करिस्सं वापि कारेस्सं वापीति एवमादिना सत्ताहकिच्चेन पहितेपि वा अपहितेपि वा गन्तुं लब्भन्ति योजना।

एत्थ पन लब्भमानकवसेन योजेत्वा वक्खमाननयेन अत्थो वेदितब्बो। मातादिसुतिया तेयेव गिलान-सद्देन गय्हन्ति, तेसं उपट्ठाका तदुपट्ठाका, गिलाना च तदुपट्ठाका च, तेसं भत्तन्ति समासो। **ओसधन्**ति तेसंयेव गिलानानं भेसज्जं। **एसिस्सन्**ति परियेसिस्सामि। **पुच्छिस्सामी**ति तेयेव सत्तजने गिलाने पुच्छिस्सं। **उपट्ठिस्सन्**ति तेयेव गिलाने उपट्ठहिस्सामि। अभिरमतीति अभिरतो, विसभागरूपादिदस्सनेन सासने न अभिरतो **नाभिरतो**। अभिरमणं वा अभिरतं, नत्थि अभिरतमस्साति **नाभिरतो,** तं। सहधम्मिकेसु यो नाभिरतो, तं **वूपकासेस्सं** विक्खेपहरणत्थं अञ्ञत्थ नयिस्सामि। **कुक्कुच्चन्**ति पञ्चन्नंयेव उप्पन्नं विनयकुक्कुच्चं। कितकयोगे विकप्पेन दुतिया। **दिट्ठिन्**ति तेसंयेव मिच्छादिट्ठिया। **गरुकमादिकन्**ति गरुकं आदि यस्साति विग्गहो। **आदि**-सद्देन सामणेरानं वस्सपुच्छनं, सिक्खासमादयितुकामता, तज्जनीयादिकम्मकरणं सङ्गहितं। **वुट्ठानन्**ति भिक्खुनो गरुकापत्तिया परिवासमानत्तदानादीहि वुट्ठानं। **उस्सुक्कन्**ति वस्सपुच्छनादिउस्सुक्कं। **एवमादिना**ति एत्थ **आदि**-सद्देन दिट्ठिगतादीनं धम्मकथाकरणादिं सङ्गण्हाति। **गन्तुं लब्भन्**ति एत्थ गच्छन्तेन अन्तोउपचारसीमायं ठितेनेव ''अन्तोसत्ताहे आगच्छिस्सामी''ति आभोगं कत्वा गन्तब्बं। सचे आभोगं अकत्वा उपचारसीमं अतिक्कमति, छिन्नवस्सो होतीति वदन्ति। **सत्ताहकिच्चेना**ति सत्ताहस्स लब्भमानकं वुत्तं वक्खमानञ्च सङ्घकम्मादि किच्चं सत्ताहकिच्चं। सत्तमअरुणमत्तस्सेव विहारे उट्ठापनीयत्ता सत्ताहस्स साकल्लेन गहणं।

३१६. सङ्घकम्मे वजेति सङ्घस्स किच्चे उपोसथागारादीसु सेनासनेसु वा चेतियछत्तवेदिकादीसु वा अन्तमसो पुग्गलिकसेनासनेसु वापि कत्तब्बनिमित्ते वजेय्याति अत्थो। धम्मसवनत्थं निमन्तितो वापि वजे, गरूहि पेसितो वापि वजे, गरूनं पस्सितुं वापि वजेति योजेतब्बं। **निमन्तितो**ति एत्थ सचे पठमंयेव कतिका कता होति, ''असुकदिवसं नाम सन्निपतितब्ब''न्ति निमन्तितोयेव नाम होति। **गरूही**ति आचरियुपज्झायेहि। **पहितो**ति भण्डधोवनादिअत्थाय पेसितो। **पस्सितुन्**ति अगिलानेपि।

३१७. भण्ड...पे०... दस्सने न वजेति योजनीयं। एत्थापि निमित्तत्थे सत्तमी। **भण्डं** नाम चीवरं। **ञाती** मातापितूहि अञ्ञे। **उपट्ठाका** उपासका। ''अज्जेव आगमिस्स''न्ति अदूरगो न पापुणेय्य, लब्भन्ति सम्बन्धो। **लब्भन्**ति इमस्स अपापुणनं वुत्तकम्मं। **अज्जेवागमिस्सन्**ति सामन्तविहारं गन्त्वा पुन आगच्छन्तस्स अन्तरामग्गे सचे अरुणुग्गमनं होति, वस्सच्छेदोपि न होति, रत्तिच्छेददुक्कटञ्च नत्थीति वदन्ति।

३१८. सेसञातीहीति मातापितूहि अवसेसञातीहि। **निद्दिसित्वावा**ति दानधम्मसवनादीनि। ''पहिते पेसिते''ति चेत्थ ''लब्भ''न्ति अनुवत्तनीयं।

३१९. अत्तनो अन्तराये सतीति चोरसरीसपवाळजीवितब्रह्मचरियन्तराये, अन्तमसो भेसज्जालाभपतिरूपउपट्ठाकालाभेपि। ''वस्सच्छेदकारणम्पि सत्ताहकरणीयं सिया''ति केचि पोराणा वदन्ति, तं युत्तं विय दिस्सति, सब्बथा वस्सच्छेदेन बहि वासाय अनुञ्ञातकारणं सत्ताहमत्तं बहि वीतिनामेत्वा अन्तोविहारेयेव वासेन वस्सच्छेदाकारणं कथं नाम न सियाति। छिन्नवस्सो नो पवारयेति सम्बन्धो।

३२०. ''असेनासनिकेना''ति इमिनाव विञ्ञायमानत्थत्तेपि **''अज्झोकासे चा''**ति वचनं ''अहं अब्भोकासिको, किं मे सेनासनेना''ति वासानिवत्तनत्थं वुत्तं। **रुक्खस्स सुसिरे**ति सुद्धे रुक्खसुसिरे। महन्तस्स पन सुसिरस्स अन्तो पदरच्छदनकुटिकं कत्वा पविसनद्वारं योजेत्वा उपगन्तुं वट्टति। ''विटपेपि अट्टकं बन्धित्वा''तिआदि वुत्तनयमेव। तथा छत्तचाटीसुपि तदनुरूपेन वेदितब्बं। **छवकुटि** नाम टङ्कितमञ्चादिभेदा कुटि। तत्थ **टङ्कितमञ्चो** नाम दीघे मञ्चपादे मज्झे विज्झित्वा अटनियो पवेसेत्वा कतो, चतुन्नं पासाणानं उपरि पासाणं अत्थरित्वा कतम्पि टङ्कितमञ्चो।

३२१. असेनासनिकेनाति यस्स तिणपण्णइट्ठकसिलासुधासङ्खातानं पञ्चन्नं छदनानं अञ्ञतरेन छन्नं योजितद्वारबन्धनं सेनासनं नत्थि, तेन। इदं पन वचीभेदं कत्वा अधिट्ठानं सन्धाय वुत्तन्ति वदन्ति, तदयुत्तं, तथा च सति नावादीसु विय विसुं विधानेन भवितब्बन्ति। **नावासत्थवजूपगो**ति इमिना असेनासनिकेन नावादीसु वस्सं उपगन्तुं वट्टतीति दीपेति। तत्थ च कुटिकं परियेसित्वा लभन्तेन तत्थ पविसित्वा विहाराभावतो ''विहारे''ति अवत्वा ''इध वस्सं उपेमी''ति तिक्खत्तुं वत्तब्बं, अलभन्तेन आलयो कातब्बो। **पवारेतुञ्चा**ति **च**-सद्देन वस्सच्छेदनिमित्ताय आपत्तिया अभावं सम्पिण्डेति। ''वजे सत्थे नावायन्ति तीसु ठानेसु नत्थि वस्सच्छेदे आपत्ति, पवारेतुञ्च लब्भती''ति (महाव० अट्ठ० २०३) **अट्ठकथायं** वुत्तं। वस्सच्छेदेति च ''अनुजानामि, भिक्खवे, येन वजो तेन गन्तु''न्ति (महाव० २०३) वुत्तत्ता, सत्थस्स नावाय च गमनसभावेनेव ठितत्ता च वस्सूपगतट्ठाने अवसित्वा अञ्ञत्थ गमनमत्तं सन्धाय वुत्तन्ति वेदितब्बं।

वस्सूपनायिकनिद्देसवण्णना निट्ठिता।

४०. अवेभङ्गियनिद्देसवण्णना

३२२-५. आरामा...पे०... मत्तिकभण्डानीति एते पञ्च अविभाजियाति सम्बन्धितब्बं। **पञ्चा**ति ''आरामारामवत्थूनि एक''न्तिआदिना रासिवसेन पञ्च, सरूपवसेन पनेतानि पण्णं तिणे पक्खिपित्वा पञ्चवीसतिविधानि होन्ति। तथा चाह —

''द्विसङ्गहानि द्वे होन्ति, ततियं चतुसङ्गहं।
चतुत्थं नवकोट्ठासं, पञ्चमं अट्ठभेदनं॥

''इति पञ्चहि रासीहि, पञ्चनिम्मललोचनो।
पञ्चवीसविधं नाथो, गरुभण्डं पकासयी''ति॥ (चूळव० अट्ठ० ३२१)।

तत्थ **आरामो** नाम पुप्फारामो वा फलारामो वा। **आरामवत्थु** नाम तेसंयेव पतिट्ठानोकासो, विनट्ठेसु वा तेसु पोराणकभूमिभागो। **विहारो** नाम पासादादि यं किञ्चि सेनासनं। **लोहकुम्भी** नाम काळलोहेन वा तम्बलोहेन वा

कतकुम्भी। **कटाहादी**सुपि एसेव नयो। एत्थ **भाणक**न्ति अरञ्जरो वुच्चति। **वारको**ति घटो। रासिं अपेक्खित्वा **एते**ति पुल्लिङ्गनिद्देसो। **अविभाजिया**ति मूलच्छेज्जवसेन अवेभङ्गिया। परिवत्तनवसेन पन परिभुञ्जन्तस्स विस्सज्जेन्तस्स च अनापत्ति। **अविस्सज्जियानि चा**ति **च**-सद्देन अवेभङ्गियानि चाति अवुत्तं सम्पिण्डेति।

३२६-८. एकन्तगरुभण्डत्ता आदितो तयो रासी ठपेत्वा चतुत्थरासितो पट्ठाय गरुभण्डागरुभण्डे विभजितुं **"वल्ली"**तिआदि आरद्धं। अड्ढबाहुमत्तापि वल्लि च अट्ठङ्गुलायतो वेळु च मुट्ठिमत्तम्पि तिणादि च एकम्पि पण्णञ्च पाकता वा पञ्चवण्णा वा तालपक्कप्पमाणापि मत्तिका च तालपक्कप्पमाणापि सुधा च तालपक्कप्पमाणापि कङ्गुट्ठआदिका च दिन्ना वा तत्थजातका वा सङ्घिका रक्खिता अभाजिया, रज्जुयोत्तादि च दिन्ना सङ्घिका अभाजियाति योजना। **वेळु** परिणाहतो पण्णसूचिदण्डमत्तो गहेतब्बो। **तिणं** मुञ्जं पब्बजञ्च आदिसद्दसङ्गहितं ठपेत्वा अवसेसं यं किञ्चि तिणं। **पण्णो** अट्ठङ्गुलप्पमाणो रित्तपोत्थको गरुभण्डमेव। **पाकता**ति पकतिया जाता। **पञ्चवण्णा**ति रत्तसेतादिपञ्चवण्णा। सुधाकङ्गुट्ठादयो मत्तिकग्गहणेन गहिता। **कङ्गुट्ठआदिका**ति **आदि**-सद्देन सज्जुरसजातिहिङ्गुलकादीनं गहणं। **दिन्ना**ति सङ्घस्स दिन्ना। **तत्थजाता**ति सङ्घिकभूमियं जाता। **रज्जुयोत्तादी**ति सुत्तमकचिवाकनाळिकेरहीरचम्ममया रज्जु च योत्तादि च। **आदि**-सद्देन मकचिवाकादिके वट्टेत्वा कता एकवट्टा गहिता। ब्यतिरेकवसेन पनेत्थ चतुत्थरासिम्हि इतरे भाजियाति वेदितब्बा। सङ्घिके कम्मे, चेतियस्स वा कम्मे निट्ठिते भाजियाति योजनीयं।

३२९. लोहभण्डेसु भिक्खुसारुप्पं पत्तादि वा तथा विप्पकताकतं लोहभण्डं तथा पादगण्हकं वारकं भाजियन्ति योजना। **पत्तादी**ति अयोपत्तो अयथालकं तम्बलोहथालकं अञ्जनिसलाका कण्णमलहरणी सूचि पण्णसूचि खुद्दको पिप्फलको खुद्दकं आरकण्डकं कुञ्चिका ताळादि। **विप्पकत**न्ति अपरिनिट्ठितं। **अकत**न्ति सब्बसो अकतं। **पादगण्हक**न्ति सीहळदीपे पादगण्हनकं। **पादो** नाम चतुत्थंसो, मगधनाळिया पञ्चनाळिमत्ता। **मगधनाळि** च नामेसा ऊनपञ्चपसता वेदितब्बा। तथा घटको तेलभाजनञ्च। याय वासिया ठपेत्वा दन्तकट्ठच्छेदनं वा उच्छुतच्छनं वा अञ्ञं महाकम्मं कातुं न सक्का, अयं भाजिया। सम्मुञ्जनिदण्डखणनकं पन अदण्डकं फलमत्तमेव, यं सक्का सिपाटिकाय पक्खिपित्वा परिहरितुं, अयं भाजनीया। तिपुकोट्टकउपकरणेसु तिपुच्छेदनकसत्थकं सुवण्णकारूपकरणेसु सुवण्णच्छेदनकसत्थकं चम्मकारउपकरणेसु चम्मछिन्दनकं खुद्दकसत्थं नहापिततुण्णकारउपकरणेसु ठपेत्वा महाकत्तरिं महासण्डासञ्च महापिप्फलकञ्च सब्बानि भाजनीयभण्डानि। तथा कुञ्चिका। वुत्तविपल्लासेन पन लोहभण्डे अभाजियाति वेदितब्बा।

३३०. **"वेळुम्ही"**तिआदिना दारुभण्डानि दस्सेति। दारुभण्डेन पन सङ्गहेत्वा सब्बापि दारुवेळुचम्मुपाहनादिविकति वेदितब्बा। छत्तदण्डो च सलाका चाति द्वन्दो। उपाहनाय दण्डको **उपाहनदण्डको**।

३३१. **अनुञ्ञातवासिदण्डो**ति अनुञ्ञातवासिया दण्डो। **अरणञ्जनिसिङ्गादी**ति **आदि**-सद्देन अञ्जनिसलाका छत्तं मुट्ठिपण्णं उपाहना धम्मकरणो पादगण्हनकतो अनतिरित्तं आमलकतुम्बं आमलकघटो लाबुकतुम्बं लाबुकघटो विसाणतुम्बन्ति इदं सङ्गण्हाति।

३३२. यथावुत्ततो अञ्ञं दारुभण्डेसु गरुभण्डं। मत्तिकामयो पादघटको भाजियोति योजना। **पादघटको**ति पादस्स पहोनको घटको। इमिना मत्तिकाभण्डं उपलक्खेति, तस्मा पत्तो थालकं कुण्डिकाति इमानि भाजनीयानि, वुत्तावसेसा अभाजिया।

३३३-४. गरुना गरुभण्डञ्च थावरञ्च परिवत्तेय्य, थावरेन च थावरम्पि परिवत्तेय्याति योजेतब्बं। **गरुना** मञ्चपीठादिना। **थावर**न्ति आरामादि पठमरासिद्वयं। **तथा कत्वा च भुञ्जितु**न्ति एवञ्च परिवत्तेत्वा ततो आभतं कप्पियभण्डं परिभुञ्जेय्याति अत्थो, विधिम्हि अयं तुंपच्चयो। फातिकम्मेन वल्लादिं गण्हेति सम्बन्धनीयं। **फातिकम्मं** नाम समकं वा अतिरेकं वा तदग्घनकं वा वड्ढिकम्मं। **सेस**न्ति पठमरासित्तिकन्ति।

अवेभङ्गियनिद्देसवण्णना निट्ठिता।

४१. पकिण्णकनिद्देसवण्णना

३३५. सद्वारबन्धने सोदुक्खलकपासके ठाने दिवा सयन्तेन परिवत्तकं द्वारं बन्धेय्याति सम्बन्धो। द्वारञ्च द्वारबन्धनञ्च द्वारबन्धनानि मज्झेपदलोपवसेन, बन्धन-सद्देनेव वा द्वारबाहा वुच्चन्ति, सह द्वारबन्धनेहीति **सद्वारबन्धनं,** ठानं। हेट्ठा उदुक्खलकञ्च उपरि पासको च, सह उदुक्खलपासकेहीति समासो। तादिसे ठाने पाकारादिपरिक्खेपेन भवितब्बन्ति परिक्खित्तेति विञ्ञायति। सो च उच्चतो सहसेय्यप्पहोनके वुत्तनयोति वदन्ति। **सयन्तेना**ति पादे भूमितो मोचेत्वा निपज्जन्तेन। **परिवत्तक**न्ति संवरणविवरणवसेन इतो चितो च परिवत्तनयोग्गं। **द्वार**न्ति अन्तमसो दुस्ससाणिद्वारम्पि। **बन्धेय्या**ति सब्बन्तिमेन विधिना यावता सीसं न पविसति, तावतापि बन्धेय्य, संवरेय्याति वुत्तं होति।

३३६. आभोगो चापीति ''एस जग्गिस्सती''ति आभोगो चापि। **च**-सद्देन ''द्वारं जग्गाही''ति वचनम्पि समुच्चिनोति। **सवसे तं आकारं विना**ति सस्स अत्तनो वसे आयत्ते ठाने, यत्थ पन बहूनं सञ्चरणत्ता द्वारं संवुतम्पि संवुतट्ठाने न तिट्ठति, द्वारं अलभन्ता पाकारं अभिरुहित्वापि विचरन्ति, तादिसे परिवेणे संवरणकिच्चं नत्थि। अथ वा सस्स वसो आयत्तो, न यक्खादीनं तेहि गहितकत्तस्स, बन्धित्वा निपज्जापितत्तस्स च अभावेनाति **सवसो**। तस्मिं सति पुब्बे वुत्तद्वारं संवरणआभोगकरणवचनसङ्खातं आकारन्ति अत्थो।

३३७. रतनानीति मुत्तादीनि दसविधानि। तत्थ पन जातिफलिकं उपादाय सब्बोपि मणि वेळुरियोपि लोहितङ्को मसारगल्लो च धोतापि अधोतविद्धापि अनामासा, काचमणि च पानीयसङ्खो धोतो अधोतोपि आमासा, सिला धोतविद्धा सुवण्णेन सद्धिं पचिता मुग्गवण्णा च अनामासा। चेतियघरगोपकानं सुवण्णचेतिये कचवरमेव हरितुं वट्टति। आरकूटलोहम्पि जातरूपगतिकमेव। **इत्थिरूपानी**ति अन्तमसो पिट्ठमयइत्थिरूपानिपि। **धञ्ञ**न्ति अन्तमसो तत्थजातकम्पि मग्गे पसारितम्पि सत्तविधं धञ्ञं। कीळावसेन अपरण्णानि तालफलादीनिपि अनामासानि, पसारितम्पि न मद्दन्तेन गन्तब्बं, असति मग्गे मग्गं अधिट्ठाय गन्तब्बं। **इत्थिपसाधन**न्ति अन्तमसो पिळन्धनत्थाय ठपितं निवासनतालपण्णमुद्दिकम्पि।

३३८. सित्थतेलोदतेलेहीति मधुसित्थकनिय्यासादीसु येन केनचि तेलमिस्सकसिलेसेन च उदकमिस्सकतेलेन च। **फणहत्थफणेही**ति फणमिव फणं, अङ्गुलीहि फणकिच्चकरणेन हत्थोयेव फणं हत्थफणं, दन्तमयादि यं किञ्चि फणञ्चेव हत्थफणञ्चाति द्वन्दो। **ओसण्ठेय्या**ति ओलिखित्वा सन्निसीदापेय्य।

३३९. एकपावुरणा वा एकत्थरणा वा न तुवट्टयुं, एकमञ्चे न तुवट्टयुन्ति योजना। एकं पावुरणं एकं अत्थरणं एतेसन्ति विग्गहो। **न तुवट्टयु**न्ति न निपज्जेय्युं। एकस्मिं भाजने वापि न भुञ्जेय्युन्ति योजेतब्बं।

३४०. मनुस्सानं पमाणङ्गुलेन अट्ठ अङ्गुलानि यस्स, अधिकेन सहितं अट्ठङ्गुलन्ति समासो। **लसुणं** मगधेसु जातं

आमलकभण्डिकं लसुणं न खादेय्याति सम्बन्धो। **न अकल्लको**ति अगिलानो।

३४१. हीनुक्कट्ठेहि जातिआदीहि उक्कट्ठं वा हीनं वा उजुं वा अञ्ञापदेसेन वा दवा वदे, दुब्भासितन्ति सम्बन्धो। **जातिआदीही**ति जातिनामगोत्तकम्मसिप्पआबाधलिङ्गकिलेसआपत्तिअक्कोसेहि। **उक्कट्ठ**न्ति जात्यादीहियेव उक्कट्ठं उपसम्पन्नं अनुपसम्पन्नं वा। **दवा**ति केळिहसाधिप्पायताय। **उजुं वा**ति ''चण्डालोसी''तिआदिना नयेन। **अञ्ञापदेसेन वा**ति ''सन्ति इधेकच्चे चण्डाला''तिआदिना नयेन।

३४२. दीघे नखेति मंसप्पमाणतो। **दीघे केसे**ति द्वङ्गुलतो। सचेपि न दीघा, दुमासतो एकदिवसम्पि अतिक्कामेतुं न लभति। **दीघे नासलोमे**ति नासतो बहि निक्खन्ते। **वीसतिमट्ठ**न्ति वीसतिया नखानं मट्ठञ्च। **सम्बाधे**ति उभोसु उपकच्छकेसु, मुत्तकरणे च लोमहारणञ्च न लब्भाति सम्बन्धनीयं। **न लब्भा**ति एते मट्ठादयो न लब्भन्तीति अत्थो, निपातो वा **लब्भा**ति। आबाधप्पच्चया पन सम्बाधे लोमं संहरितुं वट्टति।

३४३. सङ्घुद्दिट्ठं वा सङ्घिकं वा सयनासनं यथावुड्ढं न बाधेय्याति योजना। सङ्घस्स उद्दिट्ठं **सङ्घुद्दिट्ठं,** सङ्घं उद्दिस्स कतन्ति अधिप्पायो। यो यो वुड्ढो **यथावुड्ढं,** वुड्ढप्पटिपाटियाति अत्थो। **न बाधेय्या**ति न पटिबाहेय्य। **अल्लपादा** नाम येहि अक्कन्तट्ठाने उदकं पञ्ञायति। **सयनासन**न्ति मञ्चपीठादि, इमिना परिभण्डकता भूमीतिपि उपलक्खिता। सुधोतपादकं वापि सउपाहनो तथेवाति सम्बन्धो। **सुधोतपादक**न्ति धोतपादेहेव अक्कमितब्बट्ठानं। धोता पादा यस्स अक्कमनस्साति किरियाविसेसनसमासो। यदि पन तत्थ नेवासिका अधोतपादेहिपि वळञ्जेन्ति, तथेव वळञ्जेतुं वट्टति। **तथेवा**ति परिभण्डकतं भूमिं सेनासनं वा नक्कमेति अत्थो।

३४४. सङ्घाटियाति अधिट्ठितसङ्घाटिया। पादे परिग्गहेत्वा आसनं पल्लत्थो, पल्लत्थं करोतीति पल्लत्थातिधातुस्स पल्लत्थेति रूपं। विहारेपि अन्तरघरेपि पल्लत्थिकाय न निसीदेय्याति अधिप्पायो, परिकम्मकतं भित्तादिन्ति योजना। **परिकम्मकत**न्ति सेतवण्णेन वा चित्तकम्मेन वा कतपरिकम्मं। **आदि**-सद्दो द्वारवातपानादिं सङ्गण्हाति। **न अपस्सये**ति चीवरादिना अप्पटिच्छादेत्वा अपस्सयनं न करेय्य। **नो न आचमे**ति नेव न आचमे, आचमेय्याति अत्थो। द्वे पटिसेधा पकतियत्थं गमेन्तीति। **सन्ते**ति इमिना उदके असन्ते अनापत्तीति दीपेति।

३४५. अकप्पियसमादानेति भिक्खूनं सामणेरानं अकप्पिये समादाने। **दवा**ति निपातो, कीळाधिप्पायेनाति अत्थो। **सिलापविज्झने**ति अन्तमसो हत्थयन्तेनपि सक्खरिकायपि खिपने। सभागाय देसनाय आविकम्मे च दुक्कटन्ति योजेतब्बं। **सभागाया**ति वत्थुवसेन समानो भागो एतिस्सा आपत्तियाति विग्गहो। **च**-सद्दो तादिसिया पटिग्गहणमत्तं समुच्चिनोति।

३४६. पटिस्सवो नाम ''उभोपि मयं इध वस्सं वसिस्साम, एकतो उद्दिसापेमा''तिआदिपटिजाननं, तस्स विसंवादो पच्छा अकरणं **पटिस्सवविसंवादो,** तस्मिं, निमित्तत्थे भुम्मं। **सुद्धचित्तस्सा**ति कथनसमये ''करिस्सामी''ति एवं पवत्तचित्तस्स। **इतरस्सा**ति अञ्ञस्स असुद्धचित्तस्स।

३४७. किच्चेति सुक्खकट्ठादिग्गहणकिच्चे सति एव पोरिसं पुरिसप्पमाणं अभिरुहेय्याति सम्बन्धो। **आपदासू**ति वाळमिगदस्सनादीसु।

३४८. परिस्सावनं विनाति सम्बन्धो। **अद्धान**न्ति हेट्ठिमन्तेन अद्धयोजनसङ्खातं अद्धानं। सचे न होति परिस्सावनं वा

धम्मकरणो वा, सङ्घाटिकण्णोपि अधिट्ठातब्बो। **याचमानस्सा**ति परिस्सावनं याचन्तस्स।

३४९. आबाधप्पच्चया अञ्ञत्र सेसङ्गे च अत्तघातने च दुक्कटन्ति योजना। **सेसङ्गे**ति अङ्गजाततो कण्णनासादिअवसेसे अवयवच्छेदने। **अत्तघातने**ति आहारुपच्छेदादिना अत्तनो मारणे।

३५०. तूलिकाय कयिरमानं इत्थिपुरिसादिकं चित्तञ्च पोत्थकञ्च कट्ठादीसु कयिरमानं चित्तपोत्थकानि, तानियेव रूपानीति समासो। जातकादीनि पन परेहि कारापेतुं लब्भन्ति। मालाकम्मादीनि सयम्पि कातुं लब्भन्ति। आरामारञ्ञगेहेसु भुञ्जन्तं न उट्ठापेय्याति योजेतब्बं। विहारसङ्खातो आरामो च अरञ्ञञ्च अन्तरघरसङ्खातं गेहञ्चाति द्वन्दो। ''आराम...पे०... गेहेसू''ति वत्तब्बे ए-कारस्स अ-कारकरणेन गाथाबन्धवसेन वुत्तं। ओकासे कते पन ''पविसथा''ति वुत्ते च पविसितब्बं उपनिसीदितब्बञ्च।

३५१. पुमयुत्तानि यानानि च सिविकञ्च हत्थवट्टकञ्च पाटङ्किञ्च अभिरुहितुं गिलानस्स कप्पतेति सम्बन्धो। **पुमयुत्तानी**ति अस्सगवादिपुरिसयुत्तानि, न धेनुयुत्तानि, सारथि पन इत्थी वा होतु पुरिसो वा, वट्टति। हत्थवट्टकेपि एसेव नयो, **यानानी**ति रथसकटादीनि, **सिविक**न्ति पीठकसिविकं, पीठकयानन्ति अत्थो। **पाटङ्की**ति अन्दोलिका। **गिलानस्सा**ति एत्थ **गिलानो** नाम न अप्पकेनपि सीसाबाधादिमत्तेन वेदितब्बो, यो पन न सक्कोति विना यानेन गन्तुं, एवरूपो वेदितब्बो। तथा हि यानं अनुजानन्तेन भगवता कोसलेसु जनपदेसु भगवन्तं दस्सनाय सावत्थिं गच्छन्तं अञ्ञतरं गिलानं भिक्खुं गन्तुमसक्कुणेय्यताय अञ्ञतरस्मिं रुक्खमूले निसिन्नं दिस्वा मनुस्सेहि तं पवत्तिं ञत्वा ''एहि, भन्ते, गमिस्सामा''ति वुत्ते ''नाहं, आवुसो, गमिस्सामि, गिलानोम्ही''ति **वुत्तवत्थुस्मिं** (महाव० २५३) अनुञ्ञातं, तथा वदन्तो च सो भिक्खु गमनुपच्छेदसाधकमेव गेलञ्ञं सन्धायाहाति विञ्ञायति अधिप्पेतत्थनिप्फत्तिया उपच्छिन्नत्ता, अपिच यानेन एकपरिच्छेदाय उपाहनाय परिच्छेदं ठपेन्तेन अट्ठकथाचरियेन ''गिलानेन भिक्खुना सउपाहनेनाति एत्थ गिलानो नाम यो न सक्कोति अनुपाहनेन गामं पविसितु''न्ति **अट्ठकथायं** (महाव० अट्ठ० २५६) वुत्तं, तस्मा यथावुत्तगिलानोव गिलानोति निट्ठमेत्थ गन्तब्बं।

३५२. **दवं करणे**ति केळिया करणे। **अञ्ञस्सा**ति अन्तमसो दुस्सीलस्सापि। **उपलाळने**ति ''पत्तं दस्सामि, चीवरं दस्सामी''तिआदिना।

३५३. विवरित्वा न दस्सयेति सम्बन्धनीयं। **ता** भिक्खुनियो।

३५४. **ओवाद**न्ति भिक्खुनीहि तेरसियं वा चातुद्दसियं वा आगन्त्वा उपोसथं पुच्छित्वा ''चातुद्दसो''तिआदिना भिक्खुना आचिक्खिते पुन ताहि उपोसथदिवसे समागन्त्वा ओवादूपसङ्कमनयाचनं, तं पातिमोक्खुद्देसकस्स आरोचेत्वा तेन कतसन्निट्ठानं गहेत्वा पाटिपदे पच्चाहरितब्बन्ति अजाननकं **बाल**ञ्च तथा कातुं असमत्थं **गिलान**ञ्च पाटिपदे गन्तुकामं **गमिय**ञ्च वज्जेत्वा अञ्ञस्स गहणपच्चाहरणानि अकातुं न वट्टति। तेन वुत्तं **''न गण्हतो''**तिआदि।

३५५. **लोकायत**न्ति निरत्थककारणप्पटिसंयुत्तं तित्थियसत्थं। तिरच्छानविज्जा च इमिनाव उपलक्खिता। **न वाचेय्या**ति परेसं न वाचेय्य। इमिनाव अत्तनो परियापुणनम्पि पटिक्खित्तं लोकायततिरच्छानविज्जाति च रागदोसमोहवड्ढानि बुद्धादिगरहिता सग्गमोक्खानं तिरो तिरियतो अञ्चिता गता पवत्ता कब्बनाटकादिका सब्बापि विज्जा अनुलोमवसेन वा विनयपरियायं पत्वा गरुके ठातब्बन्ति विनययुत्तितोपि सङ्गहिताति वेदितब्बा। एवञ्च नो गरूनमुपदेसो।

पेळायपीति यत्थ पातिं ठपेत्वा सुखिनो भुञ्जन्ति, तम्बलोहेन रजतेन वा कताय ताय आसित्तकूपधानसङ्खाताय पेळाय ठपेत्वा।

३५६. पारुतञ्च निवासनञ्च, गिहीनं हत्थिसोण्डादिवसेन पारुतनिवासनं यस्स पारुपनस्स निवासनस्साति किरियाविसेसनसमासो। गिहिपारुतनिवासनं न पारुपे न निवासेय्याति सम्बन्धो। **संवेल्लियं न निवासेय्या**ति मल्लकम्मकरादयो विय कच्छं कत्वा न निवासेय्य। एवं निवासेतुं गिलानस्सापि मग्गप्पटिपन्नस्सापि न वट्टति। यम्पि मग्गं गच्छन्ता एकं वा द्वे वा कोणे उक्खिपित्वा अन्तरवासकस्स उपरि लग्गन्ति, न वट्टति। एवं अपारुपित्वा अनिवासेत्वा च निब्बिकारं परिमण्डलं पारुपितब्बं तिमण्डलं पटिच्छादेन्तेन परिमण्डलं निवासेतब्बञ्च, तथा अपारुपित्वा अनिवासेत्वा च आरामे वा अन्तरघरे वा अनादरेन यं किञ्चि विकारं करोन्तस्स दुक्कटं। **दाय**न्ति वनं। **नालिम्पयेय्या**ति ''सब्बूपकारानि विनस्सन्तू''ति वा खिड्डाधिप्पायेन वा नालिम्पयेय्य।

३५७. वड्ढिं नो पयोजये अञ्ञातकप्पवारिते नो याचेति योजना। **अञ्ञस्सा**ति सहधम्मिकस्सापि। कतिपाहं भुत्वा वाति योजनीयं। **पुनो**ति निपातो।

३५८. दण्डिनं ञत्वा वा अञत्वा वा उद्दिस्स रक्खं याचने दण्डिते दण्डो अस्स गीवाति योजना। दण्डं गण्हतीति पच्चयन्तस्स दण्डिनं दण्डग्गहणन्ति अत्थो। **उद्दिस्सा**ति ''अम्हाकं विहारे असुकेन च असुकेन च इदं नाम कत''न्ति, ''करिस्स''न्ति वा एवं अतीतं वा अनागतं वा आरब्भ। **याचने**ति वोहारिकेसु याचने सति। **दण्डिते**ति तेहि दण्डे गहिते सो दण्डो अस्स याचकस्स भिक्खुनो गीवा, इणं होतीति अत्थो। वोहारिकेहि पन ''केना''ति वुत्ते ''असुकेनाति वत्तुं अम्हाकं न वट्टति, तुम्हेयेव जानिस्सथ, केवलञ्हि मयं रक्खं याचाम, तं नो देथ, अवहटभण्डञ्च मं आहरापेथा''ति वत्तब्बं। एवं अनोदिस्स आचिक्खणा होति, सा वट्टति। **पाराजिकादिका**ति पाराजिकथुल्लच्चयदुक्कटानि।

३५९.''हरन्तेसु परिक्खारं,
चोरो चोरोति भासिते।
अनत्थायेसं गण्हन्ते''ति॥ –

पाठेहि भवितब्बं। एवञ्हि सति ''हरन्तेसू''ति बहुवचनेन सह घटते। परिक्खारं हरन्तेसु एसं अनत्थाय ''चोरो चोरो''ति भासिते दण्डं गण्हन्ते तत्तकं अस्स गीवाति योजेतब्बं। **हरन्तेसू**ति चोरेसु गहेत्वा गच्छन्तेसु। **एस**न्ति चोरानं। **गण्हन्ते**ति वोहारिकजने गण्हन्ते। यत्तकं गहितं, तत्तकं अस्स भिक्खुनो गीवा, भण्डदेय्यं होतीति अत्थो।

३६०. पाकारकुट्टानं बहि वळञ्जे वापि वीहादिनाळिकेरादिरोपिमे हरिते वापि विघासुच्चारसङ्कारमुत्तं नावलोकिय छड्डेय्य, दुक्कटन्ति सम्बन्धो। **वळञ्जे नावलोकिया**ति च इमिना ओलोकेत्वा वा अवळञ्जे वा विघासादीनि छड्डेन्तस्स अनापत्तीति दीपेति। वीहि आदि येसं सालिआदीनं ते वीहादयो, नाळिकेरो आदि येसं अम्बपनसादीनं ते नाळिकेरादयो, वीहादयो च नाळिकेरादयो चाति द्वन्दो, तेसं रोपो, तेन निब्बत्तं **वीहादि...पे०... रोपिमं। हरिते**ति हरितट्ठाने। **विघासो** नाम उच्छिट्ठोदकचलकादि।

३६१. धम्मयुत्तम्पि नच्चञ्च गीतञ्च वादितञ्च योजापेतुञ्च पयोजेतुञ्च पयुत्तानि पस्सितुञ्च ''उपहारं करोमा''ति वुत्ते सम्पटिच्छितुं वा न लब्भन्ति सम्बन्धो। **धम्मयुत्तम्पी**ति रतनत्तयगुणूपसंहितताय अन्तमसो धम्मेन पुञ्ञेन संयुत्तम्पि।

नच्चन्ति अन्तमसो मोरसुकमक्कटादीनं नच्चम्पि। **गीत**न्ति अन्तमसो गीतस्स पुब्बभागे कयिरमानं दन्तगीतम्पि। **वादित**न्ति अन्तमसो उदकभेरिवादितम्पि। **योजापेतु**न्ति अञ्ञेहि कारापेतुं। **पयोजेतु**न्ति अत्तना कातुं। आयतकेन गीतस्सरेन धम्मम्पि भासितुं न वट्टति। **पयुत्तानी**ति परेहि येहि केहिचि कतानि। **पस्सितु**न्ति इमिना अनोलोचनदस्सनम्पि गहितन्ति सोतुन्तिपि अत्थो विञ्ञायति। अन्तरारामे ठितस्स पस्सतो अनापत्ति। वीथियं ठत्वा गीवं परिवत्तेत्वा पस्सतोपि आपत्तियेव। येन केनचि करणीयेन गतट्ठाने पस्सति, सुणाति वा, अनापत्ति। **सम्पटिच्छितु**न्ति ''साधू''ति सम्पटिच्छितुं। ''उपहारकरणं नाम सुन्दर''न्ति वत्तुं वट्टति। **वा**-सद्दो समुच्चये।

३६२. ''कीळत्थं कतं राजागार''न्तिआदिना सम्बन्धितब्बं। चित्तेन विचित्तकं आगारं **चित्तागारकं**।

३६३. आसनेन नवे न पटिबाहेय्याति योजना। **आसनेना**ति आसनतो। **न पटिबाहेय्या**ति न उट्ठापेय्य। उण्हे चीवरं न निदहेय्याति योजनीयं। **न निदहेय्या**ति अधिकं न निदहेय्य। **गरुना**ति आचरियुपज्झायेन। **पणामितो**ति ''मा इध पविसा''तिआदिना निक्कड्ढितो।

३६४. सत्तहि आपत्तीहि च भिक्खुं वापि अञ्ञेनेव च उपासकं वापि परम्मुखा अक्कोसने दुक्कटन्ति योजेतब्बं। **आपत्तीहि चा**ति **च**-सद्दो अवधारणे। **अञ्ञेनेव चा**ति एत्थ **एव चा**ति निपातसमुदायो, एको एव वा अवधारणे, वुत्ततो अञ्ञेनेव ''असद्धो''तिआदिनाति अत्थो। **परम्मुखा**ति निपातो, तस्स असम्मुखेति अत्थो। सम्मुखा वदन्तस्स पाचित्तियं। पापगरहणवसेन पन वदतो अनापत्ति।

३६५. **सद्धादेय्यं** सद्धाय दातब्बं चीवरञ्च च-सद्देन अवसेसम्पि **विनिपातेतुं** नासेतुं न लब्भं, पितूनं लब्भन्ति सम्बन्धो। **ञातीनम्पी**ति **पि**-सद्दो सम्भावने।

३६६. अञ्ञत्र वस्संवुत्थो अञ्ञतो भागं गण्हेय्य, दुक्कटन्ति सम्बन्धो। **अञ्ञत्रा**ति अञ्ञस्मिं विहारे। **अञ्ञतो**ति अञ्ञविहारतो। **पटिदेय्या**ति गहितट्ठाने ददेय्य। गहिते तस्मिं वत्थुस्मिं नट्ठे वा जिण्णे वा तस्स गीवाहो तीति सम्बन्धो। चोदितो नो ददेय्य, तेसं धुरनिक्खेपतो भण्डग्घकारियो होतीति योजना। **चोदितो**ति वत्थुसामिकेहि ''देही''ति वुत्तो। **तेस**न्ति तस्मिं विहारे लाभीनं भिक्खूनं।

३६७. सन्तरुत्तरो वा कल्लो सउपाहनो वा गामं न पविसेय्य, चामरीमकसबीजनिं न धारेय्याति योजनीयं। अन्तरञ्च उत्तरञ्च, सह अन्तरुत्तरेन **सन्तरुत्तरो**। अग्गळगुत्ते विहारे सङ्घाटिं निक्खिपित्वा गन्तुं वट्टति। आरञ्ञकेन पन भण्डुक्खलिकाय पक्खिपित्वा पासाणरुक्खसुसिरादीसु पटिच्छन्नेसु ठपेत्वा गन्तब्बं। अन्तरुत्तरानं निक्खेपे अयमेव नयो। **कल्लो**ति अगिलानो। मकसानं बीजनी मकसबीजनी, चमरीनं वाळेहि कता मकसबीजनीति समासो।

३६८. आरामतो बहीति सम्बन्धनीयं। **आरामतो**ति आरामूपचारतो। **न धारेय्या**ति अगिलानो न धारेय्य। यस्स पन कायदाहो वा पित्तकोपो वा होति, चक्खु वा दुब्बलं, अञ्ञो वा कोचि आबाधो विना छत्तेन उप्पज्जति, तस्स गामे वा अरञ्ञे वा छत्तं वट्टति। **गुत्तिया लब्भती**ति वस्से चीवरगुत्तत्थं, वाळमिगचोरभयेसु अत्तगुत्तत्थम्पि लब्भतीति अत्थो। एकपण्णछत्तं पन सब्बत्थेव वट्टति।

३६९. उभतोकाजं न गाहेय्याति सम्बन्धो। उभतो दण्डस्स उभयकोटियं भारबन्धकाजं **उभतोकाजं,**

अलोपतप्पुरिसो। **एकन्तरिककाजक**न्ति अन्तरमेव अन्तरिकं, एकञ्च अन्तरिकञ्चाति द्वन्दो, एकन्तरिके भारबन्धकाजन्ति तप्पुरिसो एकतोकाजकं, अन्तरिककाजकन्ति वुत्तं होति। हत्थे ओलम्बो अस्स भारस्साति समासो।

३७०. अनोकासकतन्ति ''करोतु मे आयस्मा ओकासं, अहं तं वत्तुकामो''ति एवं चोदकेन ओकासे कारापिते नत्थि ओकासो कतो अनेन चुदितकेनाति बहुब्बीहि। **चोदेय्या**ति चावनअक्कोसकम्मवुट्ठानाधिप्पायेन चोदेय्य। उपोसथप्पवारणट्ठपनअनुविज्जधम्मकथाधिप्पायेसु ओकासकम्मं नत्थि। **सुद्धस्सा**ति अनापत्तिकताय सुद्धस्स। **अवत्थुस्मि**न्ति अकारणे। **तथा**ति दुक्कटं अतिदिसति। करोन्तेनापि ''भूतमेव नु खो आपत्तिं वदति, अभूत''न्ति एवं उपपरिक्खित्वा कातब्बा। ''अनुजानामि, भिक्खवे, पुग्गलं तुलयित्वा ओकासं कातु''न्ति (महाव० १५३) हि वुत्तं।

३७१. सत्तानं पकतङ्गुलेन अट्ठङ्गुलाधिकं मञ्चप्पटिपादं वा उच्चपादकं मञ्चं वा न धारयेति योजना। पकतिया अङ्गुलं **पकतङ्गुलं**। तञ्च वड्ढकिअङ्गुलं वेदितब्बं। अट्ठ च तानि अङ्गुलानि च, तेहि तमधिकं यस्साति समासो। मञ्चानं पटिपादो, यत्थ मञ्चपादे निक्खिपन्ति। अट्ठङ्गुलतो उच्चा पादा यस्साति बहुब्बीहि।

३७२. मूगब्बतादिन्ति मूगानमिव तुण्हीभावसङ्खातं वतं आदि यस्स गोवतादिनो तित्थियवतस्साति समासो। खुरमेव भण्डं **खुरभण्डं**। पुब्बे न्हापितो **न्हापितपुब्बको,** विसेसनस्स परनिपातो।

३७३. हत्थकम्मन्ति हत्थेन कातब्बं वड्ढकिआदीनं कम्मं। अनुस्सरणं ''कप्पियत्तं मे येन याचितं, अम्हेहि इमस्स दातब्ब''न्ति एवं चित्तप्पवत्तिअनुसारो, तस्सा याचनाय अनुसारो **तदनुसारो,** ततो लद्धं यं किञ्चि गहेतुन्ति योजना। कम्मतो निग्गतो **निक्कम्मो,** विघासादादि। तं अयाचित्वापि कारेतुन्ति सम्बन्धो। **आहरापेतु**न्ति अरञ्ञतो आनेतुं। **अपरसन्तक**न्ति दारुतिणपलालादिकं अपरपरिग्गहितं।

३७४. गिहीनं यत्तकं देति, गोपके देन्ते गहेतुं लब्भं, सङ्घचेतियसन्तके यथापरिच्छेदं गहेतुं लब्भन्ति योजना। **देती**ति गोपको भिक्खूनं देति। **गहेतु**न्ति तत्तकं गहेतुं। **सङ्घचेतियसन्तके**ति वेतनगोपकेहि दीयमाने सङ्घस्स चेतियस्स च सन्तके। **यथापरिच्छेद**न्ति यं तेसं सङ्घेन अनुञ्ञातं होति ''दिवसे दिवसे एत्तकं नाम खादथा''ति, तं परिच्छेदं अनतिक्कम्म। सङ्घिके च चेतियसन्तके च केणिया गहेत्वा आरक्खन्तस्सेव हि दाने परिच्छेदो नत्थि।

३७५. ''कायवाचाहि द्वीहि आपत्तिं आपज्जेय्या''ति येभुय्यवसेन वुत्तं, मेथुनधम्मे परूपक्कमे सति सादियन्तस्स अकिरियसमुट्ठानभावसम्भवतो। **छहि वा**ति आपत्तुप्पत्तिकारणसङ्खातेहि छहि समुट्ठानेहि वा आपत्तिं आपज्जेय्याति सम्बन्धो। सब्बापत्तीनञ्हि कायो वाचा कायवाचा कायचित्तं वाचाचित्तं कायवाचाचित्तन्ति छ समुट्ठानानि। तत्थ पुरिमानि तीणि अचित्तकानि, पच्छिमानि सचित्तकानि।

तिधा एकसमुट्ठाना, पञ्चधा द्विसमुट्ठिता।
द्विधा तिचतुरो ठाना, एकधा छसमुट्ठिता॥

तत्थ चतुत्थेन पञ्चमेन छट्ठेन च समुट्ठानतो **एकसमुट्ठाना तिधा**। पठमचतुत्थेहि च दुतियपञ्चमेहि च ततियछट्ठेहि च चतुत्थछट्ठेहि च पञ्चमछट्ठेहि च समुट्ठानतो **द्विसमुट्ठिता पञ्चधा**। पठमेहि च तीहि पच्छिमेहि च तीहि समुट्ठानतो **तिसमुट्ठाना द्विधा**। पठमततियचतुत्थछट्ठेहि च दुतियततियपञ्चमछट्ठेहि च समुट्ठानतो **चतुसमुट्ठाना द्विधा**। छहिपि

समुट्ठितो **छसमुट्ठाना एकधा**। अलज्जि...पे०... सञ्जिताय चाति इमेहि छहि वा आपत्तिं आपज्जेय्याति सम्बन्धो। यो सञ्चिच्च आपत्तिं आपज्जति, आपत्तिं परिगूहति, अगतिगमनञ्च गच्छति, एदिसो वुच्चति अलज्जी पुग्गलो। अलज्जी च अञ्ञाणो च कुक्कुच्चपकतो च कुक्कुच्चेन अभिभूतोति द्वन्दो। भावे त्तप्पच्चयो।

तत्थ यो अकप्पियभावं जानन्तोयेव मद्दित्वा वीतिक्कमं करोति, अयं **अलज्जिता आपज्जति**। मन्दो मोमूहो कत्तब्बाकत्तब्बं अजानन्तो अकत्तब्बं करोति, कत्तब्बं विराधेति, अयं **अञ्ञाणत्ता आपज्जति**। कप्पियाकप्पियं निस्साय कुक्कुच्चे उप्पन्ने विनयधरं अपुच्छित्वा मद्दित्वा वीतिक्कमति, अयं **कुक्कुच्चपकतत्ता आपज्जति**। सतिया प्लवो सम्मोहो **सतिप्लवो,** सहसेय्यतिचीवरविप्पवासादीनि सतिप्लवा आपज्जति। कप्पञ्च अकप्पियञ्च कप्पाकप्पियं, कप्पाकप्पिये सञ्ञा, सा अस्स अत्थीति कप्पा...पे०... सञ्ञी, तस्स भावोति ता-पच्चयो। य-लोपेन पन **''सञ्जिता''**ति वुत्तं, करणत्थे वा पच्चत्तवचनं। ते च ''अकप्पिये''तिआदीनं यथाक्कमेन युज्जन्ति। तत्थ यो अच्छमंसं ''सूकरमंस''न्ति खादति, विकाले कालसञ्जिताय भुञ्जति, अयं **अकप्पिये कप्पियसञ्जिताय आपज्जति**। यो पन सूकरमंसं ''अच्छमंस''न्ति खादति, काले विकालसञ्ञाय भुञ्जति, अयं **कप्पिये अकप्पियसञ्जिताय आपज्जति**।

३७६. अलज्जिअञ्ञाणताय कायवाचाहि आपत्तिं छादयेति योजना। **लिङ्गे**ति लिङ्गपरिवत्तननिमित्तं। लिङ्गे सङ्घे च गणे च एकस्मिं चाति आपत्तिवुट्ठिति चतुधा होतीति सेसो।

३७७. पच्चयद्वयेति चीवरे पिण्डपाते च। **परिकथोभासविञ्ञत्ती**ति अभिलापमत्तमेतं। सहचरितस्स पन निमित्तकम्मस्सापि एत्थेव सङ्गहो वेदितब्बो। तत्थ परियायेन कथनं **परिकथा**। उजुकमेव अवत्वा यथा अधिप्पायो विभूतो होति, एवं ओभासनं **ओभासो**। पच्चये उद्दिस्स यथा अधिप्पायो ञायति, एवं विञ्ञापनं **विञ्ञत्ति**। निमित्तकरणं **निमित्तकम्मं। ततिये**ति सेनासने। **सेसे**ति गिलानपच्चये।

३७८. पञ्चन्नं सहधम्मिकानं अच्चये दानं न रूहतीति सम्बन्धो। **अच्चये दान**न्ति ''ममच्चयेन मय्हं सन्तकं उपज्झायस्स होतू''तिआदिना एवं अत्तनो अपगमे दानं। **त**न्ति अच्चयेन दिन्नं चीवरादिकं सङ्घस्सेव च होति, न भिक्खुनोति अधिप्पायो। **गिहीनं पना**ति गिहीनं अच्चये दानं पन। इदमेत्थ दानग्गहणलक्खणं — ''इदं तुय्हं दम्मी''तिआदिना सम्मुखा वा ''इत्थन्नामस्स देमी''तिआदिना परम्मुखापि दिन्नंयेव होति। ''तुय्हं गण्हाही''ति वुत्ते ''मय्हं गण्हामी''ति वदति, सुदिन्नं सुग्गहितञ्च। ''तव सन्तकं करोहि, तव सन्तकं होतु, तव सन्तकं कारापेही''ति वुत्ते ''मम सन्तकं करोमि, मम सन्तकं होतु, मम सन्तकं करिस्सामी''ति वदति। दुद्दिन्नं दुग्गहितञ्च। सचे पन ''तव सन्तकं करोही''ति वुत्ते ''साधु, भन्ते, मय्हं गण्हामी''ति गण्हाति, सुग्गहितन्ति।

३७९. भिक्खु वा सामणेरो वा **उपस्सये** भिक्खुनीनं विहारे **कालं कयिराथ** यदि कालङ्करेय्य, **तत्थ** तस्मिं उभिन्नं सन्तके भिक्खुसङ्घो एव **दायज्जो** सामी होतीति सेसो। **सेसेपी**ति अवसेसे भिक्खुनिसिक्खमानसामणेरिसन्तकेपि। **अयं नयो**ति यदि ते भिक्खूनं विहारे कालं करेय्युं, तेसं सन्तके भिक्खुनिसङ्घो एव दायज्जोति अयमेव नयोति अत्थो।

३८०. ''इमं नेत्वा असुकस्स देही''ति **दिन्नं** याव परस्स हत्थं न पापुणाति, ताव **पुरिमस्सेव,** यो पहिणति, तस्सेवाति अत्थो। **दम्मी**ति ''इत्थन्नामस्स देमी''ति **दिन्नं** पन **पच्छिमस्सेव,** यस्स पहिणति, तस्सेव सन्तकन्ति अत्थो। **इमं विधिं** ''वुत्तनयेन इमे सामिनो होन्ती''ति एतं पकारं **ञत्वा** विस्सासग्गाहं वा गण्हे, मतकचीवरं वा अधिट्ठेति योजना। **विस्सासगाह**न्ति सामीसु जीवन्तेसु विस्सासेन गाहं गहेत्वा। **मतकचीवरं अधिट्ठे**ति तेसु मतेसु अञ्ञे चे भिक्खू न सन्ति,

''मय्हं तं पापुणाती''ति मतकचीवरं अधिट्ठेय्य। अञ्ञेसं अदत्वा दूरे ठपितमतकपरिक्खारा पन तत्थ तत्थ सङ्घस्सेव होन्ति। भिक्खुम्हि कालकते सङ्घो सामी पत्तचीवरे, अपिच गिलानुपट्ठाका बहूपकारा, सङ्घेन तिचीवरञ्च पत्तञ्च गिलानुपट्ठाकानं दातब्बं। यं तत्थ लहुभण्डं लहुपरिक्खारं, तं सम्मुखीभूतेन सङ्घेन भाजेतब्बं। यं तत्थ गरुभण्डं गरुपरिक्खारं, तं आगतानागतस्स चातुद्दिसस्स सङ्घस्स अविस्सज्जियं अवेभङ्गियं। **गिलानुपट्ठाको** नाम गिही वा होतु पब्बजितो वा, अन्तमसो मातुगामोपि, सब्बे भागं लभन्ति। बहू चे सब्बे समग्गा हुत्वा उपट्ठहन्ति, सब्बेसं समभागो दातब्बो। यो पनेत्थ विसेसेन उपट्ठहति, तस्स विसेसो कातब्बो।

३८१. ''लोहभण्डे पहरणिं ठपेत्वा सब्बं कप्पती''तिआदिना योजेतब्बं। **पहरणि**न्ति आवुधं। पादुका च सङ्कमनीयो पल्लङ्को चाति द्वन्दो। मत्तिकामये कतकं कुम्भकारिकञ्च ठपेत्वा सब्बं कप्पतीति योजनीयं, धनियस्सेव सब्बमत्तिकामयकुटि **कुम्भकारिका**ति।

पकिण्णकनिद्देसवण्णना निट्ठिता।

४२. देसनानिद्देसवण्णना

३८२. इदानि देसनानिदस्सनब्यासेन हेट्ठा अवुत्तानि कानिचि सिक्खापदानि उपदिसितुं **''चागो''**तिआदिमाह। भिक्खुभावस्स यो चागो, सा पाराजिकदेसनाति सम्बन्धो। भवति अनेनाति भावो, सद्दप्पवत्तिनिमित्तं, भिक्खुनो भावो भिक्खु-सद्दस्स पवत्तिनिमित्तं भिक्खुकिच्चं **भिक्खुभावो,** तस्स। दिसी उच्चारणे, उच्चारणा पकासना देसना। ''छन्नमतिवस्सति, विवट्टं नातिवस्सती''ति (उदा॰ ४५) हि वुत्तं। इध पन भिक्खुभावपरिच्चागोयेव पाराजिकाय पकासना नाम पाराजिकाय देसना। ''यो''ति वुत्तत्ता ''सो''ति वत्तुं युत्तं, तथापि सब्बादीहि वुत्तस्स वा लिङ्गमादिय्यते वक्खमानस्स वाति वक्खमानदेसनापेक्खाय **''सो''**ति वुत्तं। यथा येन पकारेन ''छादेति जानमापन्न''न्तिआदिना वुत्तं **यथावुत्तं,** तेन। वुत्तमनतिक्कम्माति अब्ययीभाववसेन वा अत्थो वेदितब्बो। इधापि गरुकापत्तिया वुट्ठानानतिक्कमेनेव पकासना देसना सियाति **''वुट्ठानं गरुकापत्तिदेसना''**ति वुच्चति।

३८३. इदानि वत्तब्बं सन्धाय **''एव''**न्ति वुत्तं। **एकस्सा**ति एकस्स भिक्खुनो।

३८४. **तुम्हमूले**ति तुम्हाकं मूले समीपे। **पटिदेसेमी**ति पकासेमि। **संवरेय्यासी**ति संयमेय्यासि, संवरे पतिट्ठेय्यासीति अत्थो।

३८५. **निस्सज्जित्वाना**ति एकबहुभावं सन्निहितासन्निहितभावं ञत्वा ''इदं मे, भन्ते, चीवर''न्तिआदिना निस्सज्जित्वा। **तेना**ति यस्स चीवरं निस्सट्ठं, तेन। ''इमं...पे॰... दम्मी''ति निस्सट्ठचीवरं देय्यन्ति सम्बन्धितब्बं। ''इमं चीवरं दसाहातिक्कन्त''न्तिआदिना योजेतब्बं।

३८६. (क) **चीवर**न्ति तिचीवराधिट्ठाननयेन अधिट्ठितेसु सङ्घाटिआदीसु यं किञ्चि चीवरं। **विप्पवुत्थ**न्ति विप्पयुत्तेन वुत्थं।

(ख) **अकालचीवर**न्ति अनत्थते कथिने वस्सानस्स पच्छिममासं ठपेत्वा सेसे एकादसमासे, अत्थते कथिने तञ्च मासं हेमन्तिके चत्तारो मासे च ठपेत्वा सेसे सत्तमासे उप्पन्नं, कालेपि सङ्घस्स वा ''इदं अकालचीवर''न्ति एकपुग्गलस्स

वा ''इदं तुय्हं दम्मी''ति उद्दिसित्वा दिन्नं। इतरं पन कालचीवरं। **मासातिक्कन्त**न्ति अकालचीवरे उप्पन्ने ऊनस्स पारिपूरिया सङ्घगणादितो सतिया पच्चासाय मासमेकं परिहारो लब्भति, तं मासं अतिक्कन्तं।

(ग) **पुराणचीवर**न्ति यं अन्तमसो उस्सीसकं कत्वा निपन्नो। **चीवरं** नाम छन्नं अञ्ञतरं विकप्पनूपगं। एसेव नयो सब्बेसु वक्खमानचीवरप्पटिसंयुत्तसिक्खापदेसु।

(घ) **अञ्ञत्र पारिवत्तका**ति अन्तमसो हरीतकीखण्डेनपि पारिवत्तकं विना।

(ङ) **गहपतिक**न्ति भिक्खूसु अपब्बजितकं। **अञ्ञत्र समया**ति अच्छिन्नचीवरनट्ठचीवरसमयं विना, अच्छिन्नचीवरेहि पन साखापलासं अत्तना भञ्जित्वापि वाकादीनि गण्हित्वापि निवासेतुं वट्टति, पगेव विञ्ञत्ति। चीवरं विञ्ञापितन्ति सम्बन्धो। कन्ति आह **''अञ्ञातक''**न्तिआदि।

(च) **तदुत्तरी**ति ततो वुत्तप्पमाणतो उत्तरि, अच्छिन्नचीवरेन भिक्खुना कायेन वा वाचाय वा अभिहरित्वा पवारितचीवरतो तीसु नट्ठेसु द्वे सादितब्बानि, द्वीसु नट्ठेसु एकं सादितब्बं। पकतिया सन्तरुत्तरेन चरन्तेन द्वीसु नट्ठेसु द्वेयेव सादितब्बानि, एकस्मिं नट्ठे एकंयेव सादितब्बं। यस्स एकंयेव होति, तस्मिं नट्ठे द्वे सादितब्बानि।

(छ) **अप्पवारितो**ति गहपतिना वा गहपतानिया वा। **विकप्प**न्ति पठमअधिप्पेततो मूलं वड्ढापेन्तो सुन्दरकामताय ''आयतं वा''तिआदिना विसिट्ठकप्पं अधिकविधानं।

(ज) **अञ्ञातके गहपतिके**ति बहूनं वसेन वुत्तमत्तमेव पुरिमतो विसेसो।

(झ) **चोदनाया**ति ''अत्थो मे, आवुसो, चीवरेना''ति चोदनाय। **ठानेना**ति कायचोदनमाह। राजादीहि पेसितेन हि दूतेन वेय्यावच्चकरस्स हत्थे चीवरचेतापन्ने निक्खित्ते तिस्सो चोदना अनुञ्ञाता, चोदनाय दिगुणं ठानं, तस्मा सचे चोदेतियेव, **न** तिट्ठति, छ चोदना लब्भन्ति। सचे तिट्ठतियेव, न चोदेति, द्वादस ठानानि लब्भन्ति। सचे उभयं करोति, एकाय चोदनाय द्वे ठानानि हापेतब्बानि।

(ट) सुद्धानि च तानि काळकानि च जातिया रजनेन वा।

(ठ) **तुल**न्ति चतूहि तुलाहि कारेतुकामतं सन्धाय वुत्तं। अत्थतो पन यत्तकेहि एळकलोमेहि कातुकामो होति, तेसु द्वे कोट्ठासा काळकानं, एको ओदातानं, एको गोचरियानं गहेतब्बो। **तुला** नाम पलसतं। **गोचरिया** नाम कपिलवण्णा। इदं मे सन्थतं कारापितन्ति योजना।

(ण) **तियोजनपरम**न्ति गहितट्ठानतो तीणि योजनानि परमो अस्स अतिक्कमनस्साति भावनपुंसकवसेन अत्थो वेदितब्बो। **अतिक्कामितानी**ति अन्तमसो सुत्तकेनपि भण्डकतभण्डहरणं विना अन्तमसो वाताबाधप्पटिकारत्थं कण्णच्छिद्दे पक्खित्तानि अतिक्कामितानि।

३८७-९. निस्सज्जित्वानाति वुत्तनयेन वत्थूनि निस्सज्जित्वा। **अथा**ति देसितानन्तरं। ''इमं जानाही''ति गिहिं वदेति योजना। **सो**ति आरामिकादिको गिही। ''इमिना किं आहरामी''ति वदेय्याति सम्बन्धो। **वदेय्या**ति यदि वदति। **इमन्ति**

अवत्वाति ''इमं आहरा''ति अवत्वा भिक्खूनं कप्पियं तेलादिन्ति वदेति सम्बन्धो। **आदि**न्ति सन्धिवसेन निग्गहितं। तेन परिवत्तेत्वान सो यं कप्पियं आहरतीति योजना। **तेना**ति निस्सग्गियवत्थुना। **द्वेपेते ठपेत्वा**ति एते रूपियप्पटिग्गाहकरूपियसंवोहारके द्वे ठपेत्वा सेसेहि परिभुञ्जितुं लब्भन्ति सम्बन्धो। **परिभुञ्जितु**न्ति तं भुञ्जितुं। **ततो**ति परिवत्तितकप्पियतो। **अञ्ञेना**ति अन्तमसो आरामिकेनापि। **तेस**न्ति वुत्तानं द्विन्नं।

३९०. अन्तमसो तन्निब्बत्ता रुक्खच्छायापीति सम्बन्धो। **तन्निब्बत्ता**ति निस्सट्ठवत्थुना किणित्वा गहितआरामे रुक्खच्छाया तन्निब्बत्ता होतीति ततो निब्बत्ताति समासो। **आदितो सन्थतत्तय**न्ति आदिम्हि कोसियसुद्धकाळकद्वेभागसन्थतत्तयं।

३९१. **एवं चे नो लभेथा**ति एवं परिवत्तेत्वा कप्पियकारको नो चे लभेय्य, **सो** गिही ''इमं छड्डेही''ति **संसियो** वत्तब्बो, एवं रूपियछड्डको गिही नो चे लभेय्य, सम्मतो भिक्खु छड्डेय्याति सम्बन्धो। **सम्मतो**ति ''यो छन्दागतिं न गच्छेय्या''तिआदिना (पारा॰ ५८४) वुत्तपञ्चङ्गसमन्नागतो रूपियछड्डकसम्मुतिया सम्मतो भिक्खु।

३९२. **एतानी**ति पटिग्गहितरूपियानि। **दुतियं पत्त**न्ति ऊनपञ्चबन्धने सति विञ्ञापितपत्तं सङ्घे वत्तुं लब्भरेति पदसम्बन्धो। **वत्तु**न्ति ''अहं भन्ते रूपियं पटिग्गहेसि''न्तिआदिना वत्तुं। सेसानि अवसेसनिस्सग्गियवत्थूनि सङ्घे एकस्मिं गणे च वत्तुं लब्भरेति योजना। **भासन्तरेनपि वत्तुं लब्भ**न्ति न केवलं पाळिभासायमेव, सीहळादिभासायपि निस्सज्जितुं लब्भतीति अत्थो।

३९३. (क) **नानप्पकार**न्ति चीवरादीनं कप्पियभण्डानं वसेन अनेकविधं। कयो गहणं, विक्कयो दानं। कयो च विक्कयो च **कयविक्कयं**।

(ग) **ऊनपञ्चबन्धनेना**ति ऊनानि पञ्च बन्धनानि यस्स, तेन, इत्थम्भूतलक्खणे करणवचनं। यथाकथञ्चि पन पञ्चबन्धनो पत्तो, पञ्चबन्धनोकासो वा, सो अपत्तो, अञ्ञं विञ्ञापेतुं वट्टति।

३९४. **सम्मन्नित्वाना**ति पदभाजनीये वुत्तञत्तिदुतियकम्मेन सम्मन्नित्वा। **सङ्घस्स पत्तन्त**न्ति **अन्त**-सद्देन पत्तानं अन्ते भवो लामको पत्तोयेव गहितो, निस्सट्ठपत्तस्स विज्जमानगुणं वत्वा थेरं, थेरस्स पत्तं दुतियत्थेरं गाहापेत्वा एतेनेव उपायेन यावसङ्घनवकं गाहापेत्वा यो तत्थ सन्निपतितसङ्घस्स पत्तेसु परियन्तो पत्तो, तं पत्तन्ति। **तस्सा**ति कतनिस्सज्जनस्स भिक्खुनो। **दापये**ति सम्मतेन पत्तगाहापकेन दापेय्य।

३९५. (क) **भेसज्ज**न्ति भेसज्जकिच्चं करोतु वा, मा वा, एवं लद्धवोहारं सप्पिआदिकं सत्ताहकालिकं।

(ख) गिम्हानस्स पच्छिममासे पुरिमो अड्ढमासो परियेसनकरणानं खेत्तं, पच्छिमड्ढमासो परियेसनकरणनिवासनानं खेत्तं, वस्सिकमासा चत्तारोपि अधिट्ठानेन सह चतुन्नम्पि खेत्तं, इमेयेव पञ्चमासा कुच्छिसमयो, इतरसत्तमासा पिट्ठिसमयो। पिट्ठिसमये परियेसन्तस्स निस्सग्गियं पाचित्तियं, कुच्छिसमये च अतिरेकड्ढमासे कत्वा परिदहतो निस्सग्गियं पाचित्तियं। तेन वुत्तं ''**अतिरेकमासे सेसे**''ति।

(ग) **सामं दत्वा**ति वेय्यावच्चादीनि पच्चासीसमानो सयमेव दत्वा। **अच्छिन्न**न्ति तं अकरोन्तं दिस्वा सकसञ्ञाय अच्छिन्नं। भिक्खुनोपि चीवरं ठपेत्वा अञ्ञं परिक्खारं, अनुपसम्पन्नस्स च यं किञ्चि परिक्खारं अच्छिन्दतो दुक्कटं।

परिच्चजित्वा दिन्नं सकसञ्ञं विना अच्छिन्दन्तो भण्डग्घेन कारेतब्बो।

(ङ) **विकप्प**न्ति ''आयतञ्च करोहि वित्थतञ्चा''तिआदिकं अधिकविधानं।

(च) **अच्चेकचीवर**न्ति गमिकगिलानगब्भिनिअभिनवुप्पन्नसद्धानं अञ्ञतरेन पवारणमासस्स जुण्हपक्खपञ्चमितो पट्ठाय ''वस्सावासिकं दस्सामी''ति दिन्नं अच्चायिकचीवरं। अच्चेकचीवरस्स अनत्थते कथिने एकादसदिवसाधिको मासो, अत्थते कथिने एकादसदिवसाधिका पञ्च मासा चीवरकालसमयो, तं अतिक्कामेन्तस्स निस्सग्गियं पाचित्तियं। तेन वुत्तं **''चीवरकालसमयं अतिक्कामित''**न्ति। कालो च सो समयो च चीवरस्स कालसमयो, तं।

(छ) सप्पटिभये आरञ्ञकसेनासने वस्सं उपगन्त्वा विहरन्तेन भिक्खुना तिण्णं चीवरानं अञ्ञतरं चीवरं पुरिमिकाय उपगन्त्वा महापवारणाय पवारितता, कत्तिकमासता, पञ्चधनुसतिकपच्छिमप्पमाणयुत्तसेनासनता, सासङ्कसप्पटिभयताति एवं वुत्तचतुरङ्गसम्पत्तियाअन्तरघरे निक्खिपित्वा सति पच्चये छारत्तपरमं तेन चीवरेन विप्पवसितब्बं। ततो चे उत्तरि विप्पवसेय्य, निस्सग्गियं पाचित्तियं। तेन वुत्तं **''अतिरेकछारत्त''**न्तिआदि।

(ज) **जान**न्ति जानन्तो।

३९६. आदिम्हि वियाति पठमनिस्सग्गिये विय।

